Thanjavur Saraswati Mahal Series No. 311

॥ शरभराजविलासः ॥

बालकृष्णजगन्नाथेन प्रणीतः

SARABHA RAJA VILASAH

By

JAGANNATHA PANDITA

Director

SARASVATI MAHAL LIBRARY,

THANJAVUR.

1990] [Price : Rs. 15-00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सरस्वतीमहालय ग्रंथमाला पुष्प -३११

॥ श्रीः ॥

॥ शरभराजविलासः ॥

बालकृष्णजगन्नाथेन प्रणीतः

सरस्वतीमहालय संस्कृतपण्डितेन
वेदान्तविशारद - वेदान्तशिरोमणि - (तमिल्‌विद्वान्) बिरुदभाजा
न. श्रीनिवासेन

संशोध्य, संस्कृतद्राविडीप्रस्तावनासहितं परिष्कृत्य सम्पादितः

0311
Sarasvati Mahal Library. Thanjavur

निबन्धोऽयं

तञ्जापुरी महाराज शरभोजी सरस्वतीमहाल् ग्रन्थालय-
निर्देशकेन
प्रकाशितः ॥

१९९०] [मूल्य रू १५—००

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रथमावृत्तिः – १९९०.

प्रकाशनम् :–

तञ्जावूर महाराजा शरभोजी सरस्वतीमहाल् ग्रन्थालय-
कार्यकारिणी समितिः तञ्जावूर्.

मुद्रकः

लक्ष्मी प्रिण्टर्स्, तंजावूर्.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Thanjavur Saraswati Mahal Series No. 311

SRI

SARABHA RAJA VILASAH

By

JAGANNATHA PANDITA

Edited with Introduction in Sanskrit and Tamil

By

Vedanta Visarada Vedanta Siromani
and Tamil Vidwan
N. SRINIVASAN
(Sanskrit Pandit, Sarasvati Mahal Library, Thanjavur)

Director

SARASVATI MAHAL LIBRARY,
THANJAVUR.

1990]

[Price : Rs. 15-00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

BIBLIOGRAPHICAL DATA

Title of the Book	Sarabha Raja Vilasa
Editor	N. Srinivasan, Sanskrit Pandit, Sarasvati Mahal Library, Thanjavur.
Publisher	Director, Sarasvati Mahal Library, Thanjavur.
Publication No.	311
Language	Sanskrit
Edition	First
Date of Publication	December 1990
Paper used	14.2 Kg. D. Demy
Size of the Book	14×21 Cms.
Printing type used	16 Pt.
Number of Pages	78
No. of Copies	500
Price	Rs. 15/-
Printers	Lucme Printers, 1086, Kakkavattaram, Thanjavur-9.
Binding	Card Board
Subject	Kavya

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

PUBLISHER'S PREFACE

—0—

Sarabharaja Vilasa by **Jagannatha Pandita** is a notable work in Sanskrit. The poet Jagannatha Pandita was also called as **Unmananda natha.** He wrote nine works, namely; Rati-Manmatha Natakam. 2) Sarabharaja Vilasam, 3) Vasumathi Parinayam 4) Gnana Vilasa Kavyam, 5) Nirthyothsava Nibandham 6) Bhaskara Vilasam, 7) Hrdayamrutam, 8) Gnaneswari Tippanam, 9) Athmabodha Vivaranam. The poet adorned the court of the Thanjavur Maratha King Serfoji-I (1711 - 1729 A. D.) The King patronised many poets and he was celebrated by the poets as Sahitya Bhojon.' This work is being published for the first time from the paper manuscript, preserved in the Sanskrit section of this library. Even though the first portion seems to be Champu Kavya in style, the later portion is in prose form. This work contains very valuable informations about the Thanjavur Palace, its administration, the art and activities of the people in those days.

The Editor Thiru N. Srinivasan, Sanskrit Pandit of this library has edited this literary piece in Sanskrit in a nice manner by giving

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

detailed introduction in Tamil and Sanskrit and also the short description about the text in Tamil for which he deserves our congratulations.

Our thanks are due to Messrs. Lucme Printers, Thanjavur for their neat execution of Printing and also for the Government of India for their generous grant for this publication.

M. SADASIVAM,
DIRECTOR,
T. M. S. S. M. Library Society.

Thanjavur,
7--12--1990.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Contents

		Page
1.	Publisher's Preface ...	i-ii
2.	उपोद्घातः S. Krishnamurthi Sastri ...	i-iv
3.	प्रास्ताविकम् ...	i-vi
4.	Tamil Preface ...	vii-xiv
5.	Glimpses in Tamil ..	xv-xix
6.	Text ...	1-47

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ उपोद्घातः ॥

विदितमिदं समेषां विदुषां यत् गद्यपद्योभयमयकाव्यरचनायां भोजराजानन्तभट्टवेङ्कटाध्वरिनीलकण्ठदीक्षितादयः गद्यप्रबन्धरचनायां च बाणभट्टप्रमुखा लब्धप्रतिष्ठा इति । किन्तु कालतस्ततोऽर्वाचीना ज्ञानतस्तत्समानाश्च कवयो बहवो भुवमिमामलञ्चक्रुः इति **सरस्वतीमहालय**प्रकाशितग्रन्थसूचिकापरिशीलनेन ज्ञातुं शक्यते ॥

विशदविज्ञातमिदं वृत्तं सर्वेषां यत्–पूर्वं चोलदेशान्तर्गततञ्जापुरीनगर्यां – गणनातीतपण्डितवर्गसम्माननपरिपोषणतो भोजराजतुल्यतां गतस्य प्रथमशरभोजीमहीपालस्य सभा नानाप्रान्तागतविविधविद्याप्रवीणपण्डित – कलाभिज्ञजनालङ्कृता आसीदिति । तत्काले तत्सदस्यैः–पण्डितैः–कविभिश्च यशसे अर्थकृते व्यवहारविदे च विरचिताः ग्रन्थाः एतावता अप्रकाशिताः बहवः दरीदृश्यन्ते । तेष्वन्यतमोऽयं **शरभराजविलास**नामा इदानीं प्रकाशितो भवति ।

एतद्रचयिता महाकविः बालकृष्णजगन्नाथः श्रीपरदेवतासपर्यासमासादितामेयमेधाविलासः आश्रितजनवत्सलस्य दत्ता-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रयस्य शरभभूपतेः वर्णनपरत्वेन काव्यमिदमरचयदिति सुव्यक्तं विज्ञायते । ग्रन्थोऽयं यद्यपि आकृत्या तनुः, तथापि विद्वज्जनश्लाघनीयवर्णनवैचित्र्येण महत्त्वमर्हत्येव ॥ चम्पूप्रबन्धरचनायां प्रवृत्तोऽयं कविः काव्येऽस्मिन् विंशतिसङ्ख्याकश्लोकमात्रनिवेशनेन आत्मनः गद्यरचनायां प्रीतिं – चातुरीं च प्रकाशयति । नेदं कथाप्रधानं कव्यम् । शरभनृपालस्य लोकोत्तरनायकत्वप्रपञ्चनपूर्वं तत्कालीनतदधीनराजकीयवृतान्तमात्रवर्णनपरम् ॥

तञ्जापुरनगरीं परितो व्याप्तायाः अद्यावधि परिदृश्यमानागाधपरिखायाः अत्युन्नताट्टालकघट्टाधिष्ठापितपरसैनिकशतघ्नशतघ्नीशतस्य, दृढतरनिखातसङ्कुललोहशङ्कुशतसङ्कटविशङ्कटकवाटानां,अनवरतयुद्धश्रद्धासमुद्धृतखड्गखेटशरशरासप्रासमुसलमुद्गरघनायोधनादिविविधायुधकरयोधसहस्रदुर्निरीक्षगुल्मशतस्य,अविरतप्रक्रान्तक्रयविक्रयशालिविविधवणिग्जनप्रसारितयावद्देशभवयथाभिलषितसमस्तपण्यवस्तुविस्तारस्य च वर्णनेन नगर्याः गुप्तिमत्त्वं समृद्धत्वं च ज्ञातुं शक्यते ॥ तथैव शरभनृपालस्य कौमारे वयसि वर्तमानस्य प्रत्यहव्यायमप्रवृत्तिः गजाश्वाद्यारोहणशिक्षायां दण्डयष्टिक्रीडायां अटनिद्वयारोपिते धनुषि बाणानुसन्धानलक्ष्यीकरणमोक्षणादिषु च शिक्षणं – सकलकलोपदेशनदीष्णदेशिकवरसान्निध्यमात्राधिगतेषु अनु – प्रासयमकश्लेषोपश्लेषसङ्कटेषु – छत्रचामरचक्रध्वज-गोमूत्रिका-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

खड्गनागपद्मसर्वतोभद्रादिबन्धप्रतिबन्धबहुलेषु, एकद्व्यक्षर-पद्याद्युपलक्षितेषु अक्षरबिन्दुमात्रार्धमात्राच्युतकगूढचतुर्थ - पादगतप्रत्यागतपादार्धपादचतुष्टयश्लोकादिदुरवबोधेषु निबन्धेषु विशिष्टवैदुष्यं, दिग्विजययात्रा, अविरतविधीयमानविविधक्रतु-कलापजागरूकता, तुरीयाश्रमविहिताचारसमाचरणपरपरमहंस-परिव्राजकवर्यसेवापरतन्त्रता एवमन्यान्यौदार्यसौशील्यदाक्षिण्य-गुणविशेषाश्च सहृदयहृदयरञ्जकतया वर्ण्यन्ते । अन्यच्च प्रशस्तप्रशास्तुरस्य शरभोजीमहीपालस्य राज्ये-परिपक्वकलम-मञ्जरीलोभसमापतत्पतत्रिकुलवित्रासनप्रपञ्चितमञ्चकाधिरूढ - शालिगोपवधूजनप्रस्तुताविगेयगेयरसानुभवक्षणविलम्बमान - पान्थजनानां, हेषमाणमहाप्रमाणवाजिवृन्दस्य, आलानशिलास्त-म्भसंरम्भाभिघातविषमितविषाणकोटिस्तम्बेरममण्डलस्य, कर-तलविधूयमानविविधायुधयोद्धृयोधानां, राजगृहप्रथमकक्ष्या - वस्थितदेशान्तरनरपालप्रहितदूतशतस्य, द्वितीयकक्ष्यान्तर - स्थापितनातिसमुन्नतकार्तस्वरमयाऽऽसनासीनसामन्तमहीपतीनां, तृतीयकक्ष्यान्तरपरिवर्तमानानां धनधान्यायव्ययगणनपरगणक-वराणां परचक्रदुराक्रमपराक्रमप्रक्रमसेनानायकानां स्वामिचित्त-वृत्यनुकारिदेशाधिकारिणां प्रविमलविवेकवत्प्राड्विवाकानां शुद्धान्ताभ्यन्तरप्रतिप्रतिहारगतवर्षवरप्रायपरिजनानां च वर्णनेन तत्कालीना व्यवहाराः ज्ञातुं शक्यन्ते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वस्तुतः कवेरस्य विशिष्टं वैदुष्यं सुस्पष्टमत्र काव्ये प्रकाशितं भवति ।। तच्च व्युत्पन्नरसज्ञबुधजनमात्रप्रमोदाय कल्पते ।।

अस्मत्परमप्रीतिभाजनेन सरस्वतीमहालयपण्डितेन **श्री श्रीनिवासेन** एतत्प्रकाशने महान् परिश्रमः कृत इति जानीमः ।।

गम्भीरारभटीवृत्त्यनुगतविचित्रशब्दचित्रचित्रिते ग्रन्थेऽस्मिन् – मुद्रणदोषपरिष्करणाय कृतः अपूर्णः प्रयत्नः भाविकाले संस्करणान्तरावसरे पूर्णो भवेदिति विश्वसिमः ।।

तञ्जपुरम्
१—१२—९०.

एस्. कृष्णमूर्तिशास्त्री.
प्रधानसंस्कृतपंडितः, सरस्वतीमहाल्

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ प्रास्ताविकम् ॥

काव्यलक्षणम् ॥

कवेः कर्म काव्यम् । काव्यं लक्षणभेदमुद्दिश्य यद्यपि बहुशो भिद्यते, तद्यथा —

‘ गुणालङ्कारयुक्तौ शब्दार्थौ काव्यमिति ’ – वामनः ॥
‘ निर्दोषगुणालङ्काररसवद्वाक्यं ’ काव्यमिति – भोजः ॥
‘ गुणालङ्काररीतिरसोपेतः सन्दर्भः ’ काव्यमिति–वाग्भटः ॥
‘रमणीयार्थप्रतिपादकः शब्दः’ काव्यमिति – पण्डितराजः ॥
‘ ध्वन्यात्मकं वाक्यं ’ काव्यमिति – महिमभट्टः ॥
‘ वाक्यं रसात्मकं ’ – काव्यमिति – विश्वनाथः ॥

इत्येवंविधानि विविधानि लक्षणानि दृश्यन्ते । तथापि समेषामेषां विभिन्नलक्षणत्वेन प्रतिभासमानानामपि तात्पर्य-विषयीभूतोऽर्थः समान एव । तच्च काव्यं हि ‘यददोषौ सालङ्कारौ शब्दार्थौ ’ नाम । तदत्रैव सर्वाणि लक्षणानि काव्यस्य पर्यवसितानि भवन्ति । एतच्च काव्यं भूम्ना भवति छन्दोबद्धम् ॥

काव्यभेदः ॥

तच्चेदं काव्यं श्रव्य-दृश्यभेदाद् द्विधम् । तच्च श्रव्यं काव्यं, महाकाव्य - खण्डकाव्य - गीतिकाव्य-भेदात् त्रिविधम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दृश्यकाव्यन्तु नाटक–प्रकरण–भाण–प्रहसन–डिम–समवकार-ईहामृग-उत्सृष्टिकाङ्क व्यायोग-वीथी-भेदभिन्नमभिनेयरूपम् ॥

एतच्च किल श्रव्य-काव्यं पुनर्गद्यपद्यमिश्रभेदात् त्रिविधम् । गद्यं हि नाम, "अपादः पदसन्तानश्छन्दोरहितो वाक्यसन्दर्भः ।" पद्यञ्च "छन्दोबद्धम् ।" मिश्रं काव्यन्तु, गद्यपद्यमयी साङ्का सोच्छ्वासा च चम्पूरित्यभिधीयते ॥

चम्पूप्रबन्धः ॥

"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते"–इति चम्पू-लक्षणमुपनिवबन्ध दर्पणकारः । गद्यपद्ययोः संमिश्रणेन चम्पूर्नि-वध्यते । चम्पूकाव्ये हि गद्यपद्ययोः स एव सम्बन्धः, यः किल सङ्गीते गीतिवाद्ययोर्नाम । आह च कविराजो भोजः —

गद्यानुवन्धरसमिश्रित - पद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः ॥ (रामायणचम्पूः)

चम्पूप्रबन्धे च पुनरुभयोर्गद्यपद्ययोः प्रायशः समानरूपेणैव सन्निवेशात् तत्वं संयगुपपन्नं भवति । चम्पूकाव्येषु गद्यपद्यगुम्फि-तत्वेन कथामेवानुवदन्ति कवयः । पद्यानि मनोरञ्जनार्थञ्च-सन्निवेश्यन्ते । चम्पूकाव्यप्रणालिः प्राचीनसंस्कृतसाहित्ये नयन-गोचरीभवति । दशमशताब्द्याः प्राक् तु चम्पूकाव्यानां

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नामापि न श्रूयते । सर्वतः प्राक् क्रैस्त ६०० तम शतकभवेन तत्रभवता दण्डिमहाभागेन स्वकीये काव्यादर्शे चम्पूलक्षण-मुपन्यस्तम् । ततः पूर्वतन एव काले स्याच्चम्पूप्रादुर्भाव इत्यनुमानं दुष्करम् ॥

चम्पूकाव्यस्य आद्यः प्रवर्तकस्तत्रभवान् त्रिविक्रमभट्टः । नलचम्पूर्नाम ग्रन्थोऽनेन सर्वप्रथमतया विरचितः । अन्येऽपि बहवोऽद्भुताश्चम्पूग्रन्थकृतो विलसन्ति स्म । सोमदेवसूरिः, भोजराजः, जीवगोस्वामी, कविकर्णपूरः, शेषकृष्णः, नीलकण्ठ-दीक्षितः, वेङ्कटाध्वरिः, तिरुमलाम्बा, श्रीनिवासकविः भगवन्त-रायः इत्यादयः बहवः कवयोऽभूवन् ॥

कोऽयं जगन्नाथकविः ? कदाऽऽसीत् ? कृतयः कति ?

विदितमेवेदमैतिहासिकशेमुषीमतां समेषां विदुषां, यदि-दानींतनतिरुच्चितञ्जावूरमण्डलान्तर्गतभूप्रदेशः 'चोलदेश' इति पुरा प्रास्ताप्यत । तस्य चोलदेशस्य नगरीललामभूता तञ्जा-पुर्येव राजधान्यासीत् । राजधानीमिमां अधिष्ठाय, पूर्वं चोलाः, पश्चाद्भूनायका नायकाः, तदनन्तरं जन्याजेयाः महाराष्ट्रीयराजन्यमूर्धन्याः चोलदेशमिमं पालयामासुः । तेषां समये चोलभूस्स्वर्णभूरभूत् ॥

A.D. 1684-1710 समये महाराष्ट्रीयराजन्यमूर्धन्येषु शाहजी महाराजः भुवमिमां शशास । सः जन्मना प्रभुरपि,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

क्रमेण कविः, नित्यप्रबन्धकर्ता, सङ्गीतसाहित्यादिषु अप्रतिहत-प्रतिभावान् 'अभिनवभोज' इति च प्रास्तूयत। तस्य च भ्राता प्रथमशरभोजिः A. D. 1711-1729 पर्यन्ते काले देश-मिमं शासनेन, समृद्धमकरोत्। यथा ज्येष्ठः शाहजिमहाराजः इन्द्र इव नाकलोकं, देशमिमं अलञ्चकार, तथैव तदनुजः प्रथमशरभोजिः उपेन्द्र इव व्यराजत ॥

तस्मिन् समये वहवः कवयः पदवाक्यप्रमाणपारावार-पारङ्गताः पण्डिताश्च स्वस्वकृतिततिभिः भुवमिमां सारस्वती-मकुर्वन्। तेषु प्रधानतया परिगण्यमानः जगन्नाथकविरपि अन्यतमः ॥

अयं कविः बालकृष्ण–लक्ष्म्यम्बिकागर्भशुक्तिमुक्ताफलः। विश्वामित्रगोत्रपारावारोत्पन्नश्चन्द्रमाः ।[1] महाराष्ट्रदेशागतः

---

[1]अन्येन्द्रं जगदस्थितेन्द्रमपि वा कर्तुं प्रगल्भेऽन्वये
संभूतो ननु **बालकृष्णसचिवो**त्तंसस्य रूपान्तरम्।
लक्ष्म्यम्बाहृदयाम्बुधेर्हिमरुचिः प्राज्ञैः प्रशस्यामिमां
प्राणैषीत्सुमतिर्यथामति जगन्नाथाभिधानः कृतिम् ॥
— भास्करविलासकाव्ये

" **श्रीमद्विश्वामित्रमुनिगोत्र**पयःपयोधिपीयूषदीधितेः अखिल-पण्डितमण्डलीमकुटमण्डनहीरस्य **श्रीमद्बालकृष्ण**सुधियस्तार्तीयी-काधमर्ण्यदूरीकरणकृतलक्षणेन **लक्ष्म्यम्बिका**गर्भशुक्तिमुक्ता-फलेन......मधुरवाग्विलाससनाथेन **जगन्नाथसुजन्मना**" ... ...
— शरभराजविलासे

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ब्राह्मण: । 'उगाऊक' इति कुलोत्पन्न: । अस्य पिता बालकृष्ण-सुधी:, प्रथमशरभोजी (क्रि. (1711-1729) महाराजस्य सभायां सचिवपदमलञ्चकार । निखिलपुरुषार्थसाधनभूते श्रीमद्भगवत्याराधनेऽभ्यर्हिततमोऽयं कवि: जगन्नाथपण्डित: ।

तस्मिन् काले पदवाक्यप्रमाणपारावारपारीणधुरीण: सर्वतन्त्रस्वतन्त्र: श्रीविद्योपासनामार्गे बहूनां उपयुक्तानां ग्रन्थ-रत्नानां विर्माता, श्रीमद्गम्भीररायदीक्षितसूरिसूनु: सुगृहीत-नामधेय: श्रीभास्करराय:, भासुरानन्दनाथइति दीक्षानामशाली तञ्जपुर्यां व्यराजत । तस्य महानुभावस्य अन्तेवासीह्ययं कवि: जगन्नाथ पण्डित: । अस्य दीक्षानामधेयं उमानन्दनाथ इति ।।

कविनाऽनेन प्रणीता: संस्कृतग्रन्था: इमे दरीदृश्यन्ते –

1. रतिमन्मथ नाटकम्
2. शरभराजविलास:
3. ज्ञानविलासकाव्यम्
4. वसुमतीपरिणयम्
5. नित्योत्सवनिबन्ध:
6. भास्करविलासं नाम भुवनाभोग:
7. हृदयामृतम् इत्यादय:

१) ज्ञानेश्वरी टिप्पणम्, २) आत्मबोधविवरणं इति ग्रन्थावुभौ महाराष्ट्रभाषायामपि कृताविति ज्ञायते ।। [1]

मातृकाया विवरणम् –

अस्मदीयसरस्वतीमहालयाख्ये मातृकागारे **शरभराज विलासं** नाम (D.No. 4241 B.No. 4994) कागदपत्रात्मिका

---

1) Mudalaam Serfojiyum Avar Kaalathu Noolgalum-by Author The Journal of Sarasvati Mahal Library Vol.No. 35 and 36

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एकैव मातृका समुपलभ्यते । मातृकान्तराभावात् शोधने महान्प्रयत्नः कृतः । अतः सर्वत्र सर्वशः बहुविधा दोषा शोधनार्हास्समुपालभ्यन्त । ग्रन्थमिमं संशोध्य प्रकाशयितुं शक्नुमो वा नवेति संशयः समजनि ।

कृतज्ञतानिवेदनम् –

अस्मिन्नेव महालये बहूनां ग्रन्थानां सम्पादकः ब्रह्मश्री **पु. म. पद्मनाभशर्मा**, श्रीविद्योपासकः, ब्रह्मश्री S. **कृष्णमूर्तिशास्त्रिवर्यश्च** महता परिश्रमेण ग्रन्थस्यास्य संशोधने साहाय्यं अकुरुतामिति ताभ्यां उभाभ्यां कार्तज्ञ्यं निवेदयामि ।

तथैवास्य ग्रन्थस्य संशोधने कृतसाहाय्याय मित्रवर्याय **देवीप्रसादशर्मणे** अविलम्बमुद्रणे कृतोद्यमेभ्यः तञ्जपुरी श्री **लक्ष्मीमुद्रणालय** निर्वाहकेभ्यश्च हार्दा धन्यवादा निवेद्यन्ते ।।

ग्रन्थस्याऽस्य प्रकाशने मामर्हं मत्वा प्रकाशनाय प्रोत्साहितवद्भ्यः ग्रन्थालयनिर्देशकेभ्यः **श्रीसदाशिवमहाशयेभ्यश्च** धन्यवादान्समर्पयामि ।।

विशेषतः प्रियपाठकाः प्रार्थ्यन्ते यत्र कुत्रापि यदि अनुपपत्तिः, अन्यथापत्तिः इत्यादयो दोषास्समुपलभ्यन्ते तर्हि तान् संसूच्य धन्यवादं स्वीकुर्वन्तु, प्रोत्साहयन्तु चास्मान् उत्तरोत्तरकर्मणीति शम् ।।

25–11–90

एन्. श्रीनिवासः
संस्कृतपण्डितः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

முகவுரை

—0—

தஞ்சை மராட்டியர் வரலாற்றில் முதலாம் சரபோஜியின் முழுமையான வரலாறும் இதுகாறும் நமக்குக் கிடைக்கவில்லை. இதனால் தமிழகத்தின் வரலாற்றையும், சம்ஸ்கிருத இலக்கிய வரலாற்றையும் எழுதும் போது, அப்பணி பூரணத்துவம் அடையாமலிருக்கிறது எனில் மிகையில்லை. காரணம், இவருடைய வரலாற்றை எழுத உதவியாகவுள்ள அக்காலத்து நூல்கள் இன்னும் அச்சாகாமலிருப்பதே.

முதலாம் சரபோஜி மன்னர் (கி. பி. 1711-1729) 18 ஆண்டுகள் தஞ்சை மண்டலத்தை ஆட்சி செய்தவர், இம்மன்னனே இந்த நூலின் கதாநாயகன். இவரது ஆட்சிக் காலத்தில் இவர் பல சோதனைகளையும், நான்கு போர்களையும் சந்தித்துள்ளார். இருந்தும் மனந் தளராது அரசை நடத்தியும், போரில் இழந்த தஞ்சையின் நிலப் பகுதிகளை மீண்டும் தஞ்சையுடன் சேர்த்தும், பல நிரந்தரப்பணிகளை மேற்கொண்டும், சிறந்த போர் வீரனாகவும் திகழ்ந்தவர். இம்மன்னனுடைய வரலாற்றையும், இவர் காலத்தில் எழுந்த நூல்களைப் பற்றியும் மிக விரிவாக இந்நூலகப் பருவ இதழ் எண்கள் 35, 36ல் எழுதியுள்ளேன். ஆகவே, இம்மன்னனுடைய வரலாற்றை ஆய்வுசெய்வோருக்கு இந்தக் கட்டுரைகள் பயனளிக்கும் என்பதென் கருத்து.

ஆதலால், இந்த நூலைப் பயில்வோருக்கு அறியும் பொருட்டு முதலாம் சரபோஜியின் வரலாறு மிகச் சுருக்கமாக இங்கு கொடுக்கப்பட்டுள்ளது.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

தஞ்சையில் மராட்டியர் ஆட்சி

தஞ்சையை ஆட்சிசெய்த முதல் மராட்டிய மன்னர் முதலாம் ஏகோஜி என்னும் வெங்கோஜி. இவர் சத்ரபதி சிவாஜியின் இளவல். ஏகோஜியின் பட்டத்து அரசி தீபாம்பாள். இவள் இங்கிலே குலத்தில் தோன்றியவள். ஏகோஜி கி. பி. 1671ஆம் ஆண்டு பெங்களூரின் ஆட்சிப் பொறுப்பில் அமர்ந்தார். 'சிவாஜியும் - ஏகோஜியும் இணைந்து தென்னாட்டையே கைப்பற்றி விடுவார்கள்' என்று கருதிய பீஜப்பூர் சுல்தான் அல்லியதில்ஷா இருவரும் இணையாமலிருக்கும் பொருட்டு ஏகோஜியுடன் நட்புக்கொண்டார்.

இந்நிலையில் மதுரை நாயக்கர் சார்பில் தஞ்சையை ஆண்டுகொண்டு வந்தரர் அழகிரி நாயக்கர். தஞ்சை நாயக்க மன்னர்களின் கடைசி வாரிசான (விஜயராகவ நாயக்கரின் பேரன்) செங்கமலதாசை தஞ்சையின் அரசுக் கட்டிலில் அமரச்செய்ய பீஜப்பூர் படையுடன் மன்னன் 'ஏகோஜி தஞ்சை வந்தடைந்தார். தனது படையினரைக் கொண்டு முற்றுகையிட்டார். இதனால் எழுந்த போரில் அழகிரி நாயக்கர் தோற்று ஒடி ஒளிந்தார். உரிய வாரிசான செங்கமலதாசை கி.பி. 1675ல் தஞ்சை அரசுக் கட்டிலில் அமர்த்தினார் ஏகோஜி.

படை எடுத்துவந்த செலவுத் தொகையைத் தரும்படி கேட்டுக்கொண்டார் ஏகோஜி. தனது படைத் தளபதி களின் பொறுப்பில் செலவுத் தொகையை வசூலிக்க ஆணையிட்டுவிட்டு. மற்றப் படையினருடன் திருமழபாடி யில் பாடி அமைத்துக்கொண்டு தங்கியிருந்தார். அப் போது சக ஆண்டு 1596 ராக்ஷஸ ஆண்டு (கி.பி. 1675ல்) ஒரு நல்லநாளில் ஏகோஜியின் பட்டமகிஷி தீபாம்பாளிடம் இரண்டாவது ஆண்மகவாக சரபோஜி தோன்றினார். திருச்சிமாவட்டம் திருமழ்பாடியில் இரவில் பிறந்தாரென்று சரபோஜி சரித்திரம் என்னும் வடமொழி நூல் கூறுகிறது.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இவரே இந்த நூலின் பாட்டுடைத் தலைவராவார் மகன் பிறந்த மகிழ்ச்சியில் திளைத்தான் ஏகோஜி. மகன் பிறந்தயோகம் தஞ்சையின் அரசுப் பொருப்பு வலிய இவரைத் தேடிக்கொண்டுவந்தது.

தஞ்சையின் மன்னனாக முடிசூட்டப் பெற்றிருந்த செங்கமலதாஸ் சிறுவனாகவும். அரசியலறிவைப் பெறா மலும் இருந்தான். இதனால் தஞ்சை அரசியலில் குழப்பங்கள் உண்டாயின. மேலும் படையெடுத்துவந்த செலவுக்குரிய தொகையைக் கொடுக்க இயலாமற் போகவே, குழப்பம் அதிகமாயிற்று. இந்நிலையில் அரண்மனையின் மந்திரி-பிரதானிகள் திருமழப்பாடியில் தங்கியிருந்த ஏகோஜீயிடம் வந்து 'தாங்களே தஞ்சையில் முடிசூடிக்கொண்டு ஆட்சிசெலுத்த வேண்டும்' என்று கேட்டுக்கொண்டனர். முதலில் மறுத்தும், பின் அதனை ஏற்றும் கி.பி. 1676ல் தஞ்சையின் மன்னனாக முடிசூடிக் கொண்டான் ஏகோஜீ. இதன்பின் ஏகோஜீக்கு மூன்றா வது குழந்தை பிறந்தது துக்கோஜீ என்று பெயரிட்டார்.

சரபோஜீ பல மொழிகளைப் பயின்றார். சிறந்த விற்பயிற்சியும், சக்தி, தோமரம் போன்ற ஆயுதங்களை யும், அஸ்திரப்பயிற்சிகளையும், இசை, நாடகம், நாட்டி யம், ஓவியம், போன்ற நுண்கலைகளையும் கற்று வாலிபப் பருவத்தையடைந்தார், எட்டு ஆண்டுகள் ஆட்சி செய்த மன்னன் ஏகோஜீ கி பி. 1684ல் காலமானார்.

தமையனும் - தம்பியரும்

ஏகோஜீ காலமானதும், இவருடைய, மூத்தமகன் இரண்டாம் ஷாஹஜீ (கி.பி. 1684-1711) பட்டத்திற்கு வந்தார், இவர் பிறவிக் கலைஞர். சம்ஸ்கிருதமும்-தமிழும் இவர் காலத்தில் சிறந்து விளங்கின. பல அறிஞர்களைக் கொண்டு பல அரிய படைப்புக்களைப் படைக்கச் செய்தார். தஞ்சையின்,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

கலைப்பாணி' என்ற பெயரை உலகமுழுதும் தெரியச் செய்தவர் இவரே எனின் மிகையில்லை. இவர் ஆட்சி செய்த காலத்தில் புதுக்கோட்டைத் தொண்டைமானும், திருச்சி நாயக்க மன்னனும் இருமுறை தஞ்சைமீது போர் தொடுத்தனர், முதலில் கி.பி. 1700-1702-க்கு இடையிலும், இரண்டாவதாக கி.பி. 1709லும் போர்கள் நடைபெற்றன இந்த இருபோர்களிலும் மராட்டியர் தோல்வியடைந்தனர். என்றாலும் கி. பி. 1709-ல் நடைபெற்ற போரில் **கல்லணை** தகர்க்கப்பட்டும், சேனைக்குப் பலத்த சேதமும் ஏற்பட்டது. இதனால் மனமுடைந்த ஷாஹஜீ தனது தம்பி முதலாம் சரபோஜீக்கு இளவரசுப் பட்டம் கட்டி அரசியலிலிருந்து துறவு கொண்டார். பின் கி.பி. 1711ல் தனது 39வது வயதில் காலமானார்.

முதலாம் சரபோஜியின் ஆட்சியில்

முதலாம் சரபோஜீ கி.பி. 1711ல் முடிசூடிக் கொண்டார். இவருடைய இளவல் துக்கோஜீ மகாதேவப் பட்டணத்திலிருந்து கொண்டு தனயனுக்கு அரசியற் பணிகளில் உதவி செய்தார். சரபோஜீ மன்னன் காலமாகும் வரை இருவரும் இணைந்தே வாழ்ந்தனர் கி.பி. 1709ல் நடைபெற்ற போரில் மராட்டியர் தோல்வியடையவும், பொருட்சேதமடையவும் காரணமாக இருந்த புதுக்கோட்டை மன்னனைப் பழிவாங்கக் காத்திருந்தார் சரபோஜி. இதனால் சேதுநாட்டின் அரசரான விஜய ரகுநாத சேதுபதியுடன் இணைந்து புதுக்கோட்டையின் மீது போர்தொடுத்தார். இருவருமே இப்போரில் தோல்வியடைந்தனர்.

பின், புதுக்கோட்டைத் தொண்டைமானுடன் இணைந்து கொண்டு கி. பி. 1723ல் சேதுநாட்டின்மீது போர்தொடுத்தார் சரபோஜி. ஆயின் இப்போர் வெற்றி தோல்வியின்றி முடிந்துவிட்டது. காரணம், சேதுபதியின் படையில் அம்மை நோய் கண்டதே. இப்போரில் பீரங்கி

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

துப்பாக்கி முதலியவைகளைப் பயன்படுத்தியுள்ளனர் என்றும், ஆங்கிலேயர்கள் இந்து அரசர்களின் படையில் கூலிப்படையினராகப் பணியாற்றியுள்ளனர் என்பதை யும் இராமநாதபுரம் அரண்மனையில் காணப்படும் சுவரோவியங்கள்' மூலம் அறியமுடிகின்றது.

விஜய ரகுநாத சேதுபதி கி. பி. 1723ல் காலமானார்) அவருக்குப்பின் திருவுடய சேதுபதி பட்டம் சூட்டிக் கொண்டார். 'இந்தப் பட்டத்திற்கு நானே உரிமை யுள்ளவன்' என்று உரிமை கொண்டாடினார் பவானி சங்கரன் (கி. பி. 1674-1708.) இவர் கிழவன் சேதுபதியின் ஆசைக்கிழத்தியின் மகன். இருவருக்குள் பெரும்பகை மூண்டது. இதனால் சரபோஜியின் உதவியை நாடினான் பவானி சங்கரன். இவருக்குத் துணையாக மீண்டும் சேதுநாட்டின்மீது போர்தொடுத்தான் சரபோஜி. இந்தப் போர் அறந்தாங்கியில் நடைபெற்றது. சரபோஜி மன்ன ரின் யானைப்படைகள் அறந்தாங்கிக் கோட்டையைத் தகர்த்தது. எதிரிகள் அழிக்கப்பட்டனர். சரபோஜி வெற்றியடைந்தார். பவானி சங்கரனுக்குச் சேதுபதி பட்டத்தைக் கட்டினார். (17261729.இதற்குப் பிரதியாக தஞ்சையின் நிலப்பகுதியுடன் பாம்பாற்றுக்கு வடக் கேயும், பட்டுக்கோட்டைக்குத் தெற்கேயுமுள்ள நிலப்பகுதி தஞ்சையுடன் இணைக்கப்பட்டது. கி.பி. 1729ல் சரபோஜி காலமானார்.

இவர் செய்த நிரந்தரப் பணிகள் :

1) கி. பி. 1709ல் பழுதுபட்ட கல்லணையை கி. பி. 1715க்குள் புதுப்பித்தார்.

2) கி. பி. 1729ல் தஞ்சை பெரியகோவிலில் பல திருப்பணிகளைச் செய்து, கும்பாபிஷேகமும் செய்வித்தார்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

3) தஞ்சையின் தெற்குவீதியிலிருக்கும் ஸ்ரீ கலியுக வரதராஜப்பெருமாள் கோவிலில் பல அழகிய சிற்பங்களை அமைத்துக்கட்டிகலைக் காவல னாக ஆனார்.

4) சம்ஸ்கிருதம்-தமிழ் ஆகிய மொழிப்புலவர்களுக்கு ஆதரவளித்தும், ஏராளமான நிலங்களைத் தானம் செய்தும், பல இலக்கிய நூல்கள் வெளிவரக் காரணமாகவும் இருந்தார்.

இதனால் புலவர்கள், தங்களை ஆதரித்த புரவல னான சரபோஜியை 'சாகித்யபோஜன்' என்று அழைத் தனர். இம்மன்னர் காலத்துப் புலவர்கள் செய்த இலக் கியங்களில் சரபராஜவிலாஸம் என்னும் இந்த நூலே அச்சாகும் இரண்டாம்நூலாகும்.

நூலாசிரியர் வரலாறு :

இந் நூலாசிரியரின் பெயர் ஜகன்னாத பண்டிதர். இவரது பெற்றோர்களின் பெயர் பாலகிருஷ்ணசுதீ-லக்ஷ்மீ இவரது தந்தை பாலகிருஷ்ணசுதீ 'சரபோஜி மன்னரின் அமைச்சர்களிலொருவர். இவர் காமேஸ்வரசூரி அல்லது காமாக்ஷிசூரி என்று அழைக்கப்படும் புலவர் பெருமா னிடம் கல்வி பயின்றவர். இவரது குடும்பத்தினர் மராட்டிய மாநிலத்திலிருந்து தஞ்சையில் குடியமர்ந்த 'தேஸஸ்த பிராமணர்கள்'. தாய்மொழி மராட்டி, குலப் பெயர் வுகாவூகர் எனப்படுவது. இவர் தஞ்சையில் பிறந்தவர். இவர் தனது வாழ்க்கையின் பிற்பகுதியில் சக்திவழிபாட்டில் (ஸ்ரீவித்யா) ஆவல் கொண்டு பாசுரானந்தர் (புகழ்பெற்ற பாஸ்கரராயதீக்ஷிதர்) அவர்களிடம் ஸ்ரீவித்யாதீக்ஷையைப் பெற்றுக் கொண்டார். இவருடைய தீக்ஷா நாமம் 'உமானந்த நாதர்' எனப்படும். இவர் தனது சொந்தப் பெயரான ஜகன்னாதபண்டிதர் என்ற பெயரைவிட உமாநந்தநாதர் என்னும் பெயராலேயே பெரும் புகழ்பெற்றவர். இவர்

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

எழுதிய நூல்களை தீக்ஷை பெறுவதற்கு முன் என்றும் பின் என்றும் இரண்டு வகைகளாகப் பிரிக்கலாம்.

தீக்ஷை அடைவதற்கு முன் தோன்றிய நூல்கள் :

1) ரதிமன்மத நாடகம்
2) சரபராஜவிலாசம்
3) வசுமதி பரிணயம்
4) ஞானவிலாச காவியம். என்பன

தீக்ஷை அடைந்தபின் எழுதிய நூல்கள் :

5. நித்யோத்ஸவ நிபந்தம். இந்த நூல் பரசுராம கல்ப சூத்திரத்தை அடிப்படையாகக் கொண்டு கி. பி. 1745ல் எழுதப்பெற்றது.

6. பாஸ்கர விலாஸம் - இவர் தனது குருவின்மீது இயற்றியது.

7. ஹ்ருதயாமிருதம் - இந்த நூலை கி. பி. 1742ல் இயற்றியுள்ளார்.

8. ஞானேஸ்வரி டிப்பணம். [1] ஞானேஸ்வரரால் எழுதப்பட்ட கீதைப்பேருரைக்குரிய (மராட்டி மொழியில்) குறிப்புரை. இந்த நூலை கி.பி. 1747ல் இயற்றியுள்ளார்.

9. ஆத்மபோத விவரணம்[2] (மராட்டி)

ஆக இப்புலவரால் இயற்றப்பெற்ற நூல்கள் எட்டு. இவரைப்பற்றி வேறு செய்திகள் கிடைக்கவில்லை.

சுவடியின் வரலாறு :

இந்த நூலகத்தின் வடமொழிப் பிரிவில் (B. 4994, D.4241) எண்ணாக இந்த காகிதச்சுவடி பதிவாகியுள்ளது.

---

1 and 2 Saraswati Mahal Library Descriptive Catalogue of Marathi MSS Vol. I Page 149, 21.

CC-0. SarTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்த நூல் ஒரே ஒரு சுவடிதான் காணப்படுகிறது. இது படி எடுத்த சுவடியாகக் காணப்படுகிறது. வேறு சுவடி களின்மையால் ஒப்பிடமுடியவில்லை. இந்த நூல் சம்பு காவியம்போல காணப்பட்டாலும் முற்பகுதியில் மட்டுமே பாடல்கள் காணப்படுகின்றன. இந்த நூலில் தஞ்சை அரண்மனையைப் பற்றிய விளக்கமும், நிர்வாகம் - மக்க ளின் கலை-தொழில் முதலிய பல செய்திகள் காணப் படுகின்றன.

நன்றியுரை :

இந்த நூலை நான் பதிப்பிக்கும்போது எனக்குப் பல்வேறு அறிவுரைகளைக் கூறி உதவி செய்த வடமொழி வல்லுநர்கள் திரு. பு. மா. பத்மநாபசர்மா அவர்களுக்கும், திரு. S. கிருஷ்ணமூர்த்தி சாஸ்திரிகள் அவர்களுக்கும் எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன். மேலும், இந்த நூலைப் பதிப்பிக்கும் போழ்து பல்வேறு உதவிகளைச் செய்த இந்நூலக இயக்குநர், திரு, மு. சதாசிவம் அவர் களுக்கும், இந்நூல் மிகக் குறுகிய காலத்தில் வெளிவரத் திறம்பட அச்சிட்டுத் தந்த தஞ்சை இலக்மி அச்சகத்தாருக் கும் எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன்.

இது போன்ற பணியில் என்னைத் தொடர்ந்து ஈடு படுத்த இறையருளைச் சிந்திக்கிறேன். இந்நூலில் காணும் பிழை குறித்து எழுதினால் அது அடுத்துவரும் பதிப்பு திருந்திய பதிப்பாக வெளியிட உதவும்.

தஞ்சாவூர்,
25—11—90.

N. ஸ்ரீநிவாஸன்,
சம்ஸ்கிருதப் பண்டிதர்
சரஸ்வதிமகால் நூலகம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

இந்நூலில் கூறப்படும் வரலாற்றுத் தொடர்புடைய செய்திகள்

'நாரிகேளபாக' நடையில் எழுதப்பெற்றுள்ள இந்நூலின் வாயிலாக சரபோஜி மன்னர் காலத்தில் நடைமுறையிலிருந்த பல செய்திகளை அறிய முடிகின்றது. இயற்கை வருணனைகள் காவியத்திற்குச் சுவையூட்டும் என்றாலும், இந்நூலாசிரியர் இம் மன்னனின் அரசவைப் புலவரானபடியால் அக் காலத்திய நாகரிகத்தின் பதிவுகளும் இக் காவியத்தில் ஏற்பட்டதில் வியப்பில்லை எனலாம்.

ஏகோஜியின் தவப்புதல்வர்களில் மூத்தமகன் ஷாஜி, இரத்தினமாலையின் நடுநாயக மணிபோன்று விளங்குபவன் இந்நூலின் பாட்டுடைத் தலைவனான முதலாம் சரபோஜி. இவர்கள் காலத்தில் தஞ்சையைச் சுற்றிலும் தென்னை - பனை - நாகை - மா - பலா முதலான எண்ணற்ற பழந்தருமரங்கள் சூழ்ந்த குளங்களும், ஆறுகளும் நிறைந்து வளம்மிக்கதாக விளங்கியது மட்டுமின்றி நகரைச்சுற்றிலும் அகன்று பரந்த ஆழம் மிக்க நீர்நிறைந்த அகழிகள் பெரிய முதலைகளுடன் விளங்கியது. உயர்ந்த மதிற்சுவற்களில் பல்லோரை ஒருசேரக் கொல்லும் திறன்படைத்த பீரங்கிபோன்ற (शतघ्नी) - (சதக்னி - பீரங்கி என்று பொருள் கொள்வது பொருத்தமாகும்) ஆயுதங்கள் பொருத்தப் பட்டிருந்தமையாலும், பகையரசர்களின் யானைகள் முட்டி - மோதித் திறக்க இயலாதவாறு கோட்டைக் கதவுகளில் கூர்மையான ஆணிகள் வெளியில் நீட்டிக்கொண்டிருந்தமையாலும், ஆங்காங்கு எப்பொழுதும் போர்வீரர்கள் குழுக்குழுவாக வாள் - கேடயம்- வில்- அம்பு- ஈட்டி- உலக்கை - இரும்புலக்கை முதலான ஆயுதங்களுடன் காவல்புரிந்தும் பயிற்சியும் பெற்றுவந்தமையாலும் தஞ்சைநகர் பகையரசர்களால் எளிதில் புகமுடியாததாக விளங்கியது. ஆனால் புலவர்களும், கலைஞர்களும் அரண்மனைக்குள் சென்றுவர எவ்விதத் தடையுமிருந்ததில்லை.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

நகரின் வீதிகளில் பன்னாட்டுக் குதிரைகளும், மனிதர்களும், தேர்களும், பல்லக்குகளும் வந்துசென்ற வண்ணமாக இருந்தமையாலும் மலர்களும்- மாவிலைத் தோரணங்களுடன் விளங்க எப்பொழுதும் இடையறாத் திருவிழாக் கோலம் பூண்டிருக்கும் நிலையைக் காண முடிந்தது. மேலும், இந்நகரில் நாட்டியம்- இன்னிசை (சங்கீதம்) பயின்ற / பயிலுகின்றவர்கள் மிகுந்திருந்தனர். மிருதங்கம்- சங்கு- துந்துபி- பேரிகை போன்றவற்றின் இன்னொலியும் இணைந்து இந்திரனின் அமராவதி போன்ற அழகுடன் தஞ்சை விளங்கிற்று. (பக்கம்-11)

கல்வித் திறனும் போர்ப் பயிற்சியும்

இயற்கையிலேயே ஆற்றல் படைத்த சரபோஜி மன்னர், இளமை முதல் கல்வியிலும், சிலம்பம் - வாள்- வில் போன்ற ஆயுதப் பயிற்சிகளிலும் மிகுந்த ஈடுபாடு கொண்டிருந்தார். அவருடைய போர்ப்பயிற்சியும் யானை குதிரையேற்றப் பயிற்சியும் இதனை நமக்குத் தெளிவு படுத்துகிறது. தவிர இலக்கிய அறிவுமிக்கவராயும் இருந்திருக்கிறார் என்பதையும் அறியமுடிகிறது.

(பக்கம்-13)

திக் விஜய யாத்திரை :

பண்டைய மன்னர்களைப் போலவே மன்னர் சரபோஜியும் தம் படைகளுடன் திக் விஜயம் செய்ததின் செய்திகளையும் அறிய முடிகிறது. (பக்கம்-14)

வேள்வியில் பற்று

பற்பல யாகங்கள் செய்யும் யக்ஞசீலர்களும், வேதவிற்பன்னர்கள் நிறைந்த, யூபஸ்தம்பங்களுடன் கூடிய அக்ரஹாரங்களுக்கு விஜயம் செய்துள்ளார்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ஜீவநதியாக ஓடும் காவிரி போன்ற ஆறுகளில் நீராடி தேவாலயங்களுக்குச் சென்று தெய்வ வழிபாட்டைச் செய்தும், உடல்வலிமை- கல்வி- தெய்வப்பற்று- தர்ம சிந்தனை மிக்கவராகவும் விளங்கினார். க்ஷத்திரிய தர்மமே உருவெடுத்தது போல விளங்கினார் சரபோஜி மன்னர். (பக்கம்-17)

விவசாய வளம் :

தஞ்சையைச் சுற்றிலும் விவசாயிகளுக்கு குடியிருப்புக்கள் அழகுற அமைத்துக் கொடுக்கப்பட்டது (பக்கம்-18)

ஆங்காங்கு பசுமையுடன் கழனிகள் விளங்கின நன்கு முதிர்ந்த சோளம் போன்ற தானியக் கதிர்களை, பறவைகளினின்றும் காப்பதற்காகப் பரண்கள் அமைக்கப் பெற்று அப்பரண்களில் பெண்கள் அமர்ந்து இனிமையுடன் பாடுகின்றனர். அப்பாட்டின் இனிமையை அவ்வழிச் செல்வோர், இருந்து - கேட்டு இன்புறும் வண்ணம் இருந்தது. (பக்கம்18)

நகரில் எப்பொழுதும் சிவ-விஷ்ணு ஆலயங்களில் திருவிழா நடந்து கொண்டே இருக்கும் என்னும் விவரம் அறியமுடிகிறது. (பககம்18)

வியாபாரம் :

தஞ்சைநகரின் கடைவீதிகளில் அனைத்துவகைப் பொருட்களும் பரப்பிவைக்கப்பட்டிருந்தன. கஸ்தூரி - புனுகு - சந்தனம் - குங்குமப்பூ போன்ற நறுமணப் பொருட்களும். பல்வேறு வகைப்பட்ட வண்ண வண்ண மலர்களால் தொடுக்கப்பட்ட மாலைகளையும், மலர் களையும் கொண்ட — பூக்கடைகள் மிகுந்திருந்தன - (பக்கம் 18)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

அரண்மனையினுள் எளிதில் எவரும் நுழைய முடியாது எனினும், முறையுடன் அனுமதி பெற்றுவரும் வெளிநாட்டு தூதர்களும், சிற்றரசர்களும், தகுந்த முறையில் வரவேற்கப்பட்டனர்

அரண்மனையின் முதல்சுற்று- பிரகாரத்தில்- வேற்றுநாட்டு அரசர்களால் அனுப்பப்பட்ட தூதர்கள் பலகடிதங்களைத் தங்கள் கைகளில் வைத்துக்கொண்டு மன்னனை நேரில்கண்டு சமர்ப்பிக்கக் காத்துக் கொண்டு இருக்கின்றனர்.

இரண்டாம் சுற்றுப் பிரகாரத்தில்- சற்றே உயரமான பொன்மயமான ஆஸனங்களில் வேற்றுநாட்டு மன்னர்கள், நவரத்தின கற்கள் பதித்த பல்வகை அணிகளையும் அணிந்துகொண்டு மன்னர் சரபோஜியின் தரிசனத்திற்காகக் காத்திருந்தனர்.

மூன்றாம் பிரகாரத்தில்- வரவுசெலவுக் கணக்கு களை எழுதும் கணக்காயர்களும், காவலர்களும், அரசருக்கு மிகவும் நெருக்கமானவர்களும், வக்கீல்களும், அரசாங்க அலுவலர்களும், நிறைந்து இருந்தனர். [பக்கம்-21]

மேலும் அரண்மனையில் செவிடர்களும் ஊமை களும், முடவர்களும், கூனர்களும், குள்ளர்களும், அலிகளும் பணிபுரிந்தனர். [பக்கம்-21]

மன்னரின் அன்றாட நிகழ்ச்சிகள்:
[Daily Routine]

முற்கால மரபுப்படி துதிப்பாடகர்கள் அதிகாலை ஸுப்ரபாதம் பாடித் துயிலெழுப்புவர் - (பக்கம்: 24)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

விழித்தெழும் மன்னர் உடனே பசுவை தரிசிப்பார்- முகம் பார்க்கும் கண்ணுடியில் தனது உருவைப் பார்த்துக் கொள்வார். அடுத்து தேகப் பயிற்சிக்குப்பின், வெந்நீரில் நீராடுவார் - (பக்கம் 24 & 25) பின்னர் நித்திய தானங்கள் (ஸ்வஸ்திவாசனம் சொல்லும் வேத விற்பன்னர்களுக்கு) செய்வார்-(பக்-26) தான் உணவு- கொள்ளுமுன் பறவைகளுக்கு உணவிடுவார் - (பக் 27) அறுசுவை உணவை உண்டபிறகு தாம்பூலம் தரித்து சபைக்குச் செல்வார்-பின்னர் கவிஞர்களுடனும், சாஸ்திர வல்லுநர்களுடனும், கலைஞர்களுடனும் உரையாடி மகிழ் வார் - (பக்கம் 31) போர்வீரர்களுக்கு மாதந்தோறும் இன்முகத்துடன் சம்பளம்வழங்குவார். ஆனந்தராயயஜ்வா முதலான அமைச்சர்களுடன் கலந்து பேசுதல்-வேட்டை நாய்களுடன் வேட்டைக்குச் செல்லுதல்- (பக்கம்-37) போன்றவை.

சில நாட்களில் நடைபெறும் சிறப்பு நிகழ்ச்சிகள் :

விலங்குப்போட்டிகள் : ஆட்டுக்கடாசண்டைகள். யானைப்போர்; மற்றும் வீரர்களின் மல்யுத்தப்போட்டியும். படகுகளில் உல்லாஸப்பயணம் செய்தலும் நடைபெறும் வேட்டைமுடித்து நகரில் பட்டணப் பிரவேசம் செய்தல் போன்றவை (பக்கம்-43-44) யுடன் நாள் நிறைவு பெறுகிறது.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

श्री दक्षिणामूर्तये नमः　　श्रीरामजयम्　　श्रीगुरुभ्यो नमः

श्री देव्यै नमः

॥ शरभराजविलासः ॥

अस्तु चिरन्तनसूक्ति
　　प्रस्तुतचरणांबुजप्रभावं नः ।
निस्तुलमभीष्टसिध्यै
　　वस्तु गिरीशाङ्कभूषणीभूतम् ॥

प्रसीदतु मे भगवान्निजकरकमलाग्रजाग्रदवबोधमुद्रा-सन्दर्शनदूरीकृतदुःश्शमतमाभ्यन्तरतमःपटलैः कुम्भसंभवप्रमुखैः महामुनिभिः अहर्निशमभिष्टूयमानमहिमा श्रीमान् वटतरुमूल-गेही देवः ॥

जयन्ति खलु मादृश, यथाजातजनघनाज्ञानतिमिर-मुष्टिन्धयनखेन्दुकिरणशालिचरणाः श्रीमद्दक्षिणामूर्तिमूर्त्यन्त-रायमाणावतरणाः कामाक्षिसूरिनामानः श्रीदेशिकचरणाः । सन्तु नाम निकामं केऽपि "अपूर्वकल्पनमसंप्रदाय" इत्यशेष कविजनानुमतं छायानुसरणं प्रहतमिति पञ्चाशता वर्णैरेव

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सहस्रशः परिवर्तमानैः अनेकधा विवर्तमानायां महाद्भुतेन निजानुभावेन प्रतिपुरुषविशेषमभिनवतयैवाविर्भवन्त्या भगवत्या गिरां देव्याः क्वाचित्कं कादाचित्कं च संवादं चौर्यमिति जल्पन्तः स्वयमनेकशतप्रबन्धायमानपदद्वयमात्रमेलनसाहसाः परं असूयामात्रफलभागिनः पुरोभागिनः ॥

नन्दन्तु पुनरेकेनापि गुणेन धनुरिव धानुष्का लालयन्तः सूक्तामृतं स्वेनैवानुभूतपदसन्दर्भसौष्टवनातिदूरान्वय यथार्थगौरवभाव गाम्भीर्यरसभूयिष्ठतादिगुणशालिप्रबन्धशत-निबन्धनजनितदुर्वचः परिश्रमविशेषाः ।

श्लोकः

अपि मुदमुपयान्तो वाग्विलासैः स्वकीयैः
परफणितिषु तोषं यान्ति सन्तः कियन्तः ।
निजघनमकरन्दस्यन्दपूर्णालवालः
कलशसलिलसेकं नेहते किं रसालः ॥

इति सुभाषितोक्तेः सफलयितारः कतिपये कवयितारः ॥

अथ चैतस्याः सुधीजनधिषणालवालसीमनि तदीय-प्राक्जन्मीयसुकृतपरिपाकवशाङ्कुरितायाः श्रीमद्गुरुचरण-करुणाकटाक्षामृतरससेक संवर्धितायाः निखिलनिगमागमस्मृति-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुराणेतिहास काव्यादिपरिशीलनपाटवतया विद्वज्जनसंस्तव-विशेषपल्लविताया गद्यपद्योभयमयत्वादि प्रदर्शितानेक प्रतानो-द्भेदाया गुणालङ्कारवृत्तिरीत्यादिकुसुमभरशालिन्या रसिक-जनरोलम्बकदम्बानुभूयमान-रसस्वादिम-सर्वस्वाया एतत्साक-व्यमयसौरभसारभरितायाः वर्णनीयवस्तुरूपोपपन्नपादपावलम्ब-प्रतिष्ठितायाः कविताकल्पलतायाः साफल्यविवक्षायां सत्यामपि देवतास्तुत्यादि–जन्यामुष्मिक श्रेयोरूपफलसंपदैहिक - फलाय-मानायाः प्रसिद्धेरपि दुस्त्यजतया तस्याश्च ॥

"कवेरल्पापि वाग्वृत्तिर्विद्वत्कर्णावतंसति ।
नायको यदि वर्ण्येत लोकोत्तर गुणोत्तरः ॥"

इत्येतादृशमहानायकगुणवर्णनमूलकत्वात्तद्विविदिपायां च जग-त्कंटकोद्धारजातावतारो जलौघेऽपि सेतुप्रबन्धप्रवीरः, जयी-लब्धपृथ्वीतनूजः प्रशस्यो जनैः 'कोशलेन्द्रोऽथवा भोसलेन्द्र' इत्यनेन श्रीमतः शरभमहाराजस्य श्रीमद्रामचन्द्रसाम्यावग-मेनाभ्यर्हिते वर्णनीयत्वे एतदीयानां च

निर्यातीव पदाम्बुजान्मधुरिपोस्सौधीव पद्मालया
वैवेत्तीव पयोम्बु(धी)ना विहरति स्रष्टुर्मुखाब्जेष्विव ।
किं च स्मेरयतीव कैरववनीं द्विष्टेकरीन्द्रानिव
क्ष्मां मूर्ध्नेव बिभर्तिकीर्तिरमला श्रीभोसलोर्वीपतेः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हीरति काञ्च्यां हारति
चोलतटेऽङ्गेषु चन्दनाम्बवति ।
कुन्दति कुन्तलदेशे
कीर्तिः शरभेशितु महीदेव्याः ॥

पश्यत्याक्रीडदर्शं समितिमरिभटान् कीटमन्थं प्रमथ्ना-
त्युद्दण्डान् केतुदण्डाननपिशरनिकरैरिक्षुभञ्जं भनक्ति ।
वेतण्डानां च शुण्डाः प्रतिनवनलिनीनाललावं लुनीते
जीवग्राहं च गृह्णात्यहितनरपतीन् लीलया भोसलेन्द्रः ॥

पद्मोल्लासैकहेतुं निखिलकुवलयस्यापि हर्षप्रदायी
लोकालोकोदरैकोदयमयपरतोऽप्यस्य विभ्राजमानः ।
अह्नचेव प्रोज्जिहानं दिनमनु च निशां द्योतमानः प्रतापं
चण्डांशोर्नातिशेतां कथमिव शरभक्षोणिपालप्रतापः ॥

कल्पन्ते घटनाय कल्पतरवस्सङ्कल्पितस्यैव ते
कामं कामयते च कामकपिला सा कामनागौरवम् ।
चिन्तायां समपेक्षते स च पुनश्चिन्तामणिस्सन्ततरां
निर्व्याजं शरभक्षमाबलभिदो निस्सीमविश्राणनम् ॥

नासत्ययोर्विभक्तं
श्राव्यमनङ्गस्य जगति रूपधेयमभूत् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ननु शरभनेतुरीदृक्
रूपं केनोपमेयमिह लोके ॥

दर्पमलप्स्यन्त परं
दिक्करिकुलशैलशेषकूर्मेन्द्राः ।
यदि नोदवक्ष्यदुर्व्या
धुरमेष भुजेन भोसलकुलेन्दुः ॥

न मदं वहति न जिह्मं
व्रजति न पङ्केस्पृहामसौ कुरुते ।
शरभनृपोऽपि च वोढा
जगतोऽन्ये चापि हन्त वोढारः ॥

संक्षुद्यखण्डमसकृत्
सिक्त्वा मधुना विधिः शरभनेतुः ।
किं निरमिमीत रसना -
मिति माधुर्या यदुल्लसन्ति गिरः ॥

यः पार्थात्प्रतिविक्रमे वितरणे यं चानु कर्णादयो
रूपे येन समुत्सुका मृगदृशो यस्मै स्वदन्ते गुणाः ।
यस्मात्पर्यवदान्यता च पितृवद्यस्य स्मरन्ति प्रजा-
नो यस्मिन्नुप कोऽपि भूपशरभः सोऽयं विजेजीयते ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

चापे द्वेष्टि दशाननं वितरणे पार्थेन विस्पर्धते
रूपे चेतसि जायते बलभिदे ब्रूते हितान्युक्तिषु ।
सार्वज्ञे निटिलेन पश्यति पुनर्धत्ते रथाङ्गं जग-
द्रक्षायामलकां प्रशास्ति विभवे श्रीभोसलक्ष्मापतिः ॥

अनुगृह्णीते दीनान्
अवगृह्णीते रणेऽरिशरवर्षम् ।
सङ्गृह्णीते गुणिनः
शरभनृपोऽयं खलान्निगृह्णीते ॥

श्रीपतये जगदवने
सार्वज्ञ्ये चापि शैलजापतये ।
सुरपतये सम्पत्सु च
शरभनृपालो वचस्सु वाक्पतये ॥

विनेता दुष्टानां प्रसभमपनेता च विपदां
प्रणेता काव्यानामनिशमनुनेता च महताम् ।
फलानामुन्नेता विधिषु परिणेता च यशसां
प्रसत्तेरानेता मयि शरभनेता विजयते ॥

इत्यादिभिः पद्यैः मनागिव प्रतिपादितानां सार्वज्ञ्य-शौर्यौदार्य-सौन्दर्य-धौरन्धर्य-वचोमाधुर्यदीनां गुणानां

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पश्यतु पदेन वेदान्
व्यस्यतु वाल्मीकतोऽप्युदेत्वथवा ।
अस्य तु शरभ महीन्दोः
कस्य पुनः शक्तिरिह गुणान् स्तोतुम् ॥

इत्युक्तरीत्या सामस्त्येन वर्णनासामर्थ्येऽपि ।

अम्भोजं न हि विष्टरं मम न वा मौलौ सुधांशोः कला
शुक्लापाङ्गयुवा न वाहनमभूदक्ष्णा न चाकर्णनम् ।
इत्थं सत्यपि यत्यते ननु गुणान् स्तोतुं शरोदप्रभोः
कस्तत्त्वाविनयो यथामति नयेन्नो वन्ध्यभूयं गिरः ॥

इत्यतः कुतूहलाकृष्टान्तरङ्गेण सर्गान्तरनिर्माणालङ्कर्मिणा श्रीमद्विश्वामित्रमुनिगोत्रपथःपयोधिपीयूषदीधितेः अखिल-पण्डितमण्डलीमुकुटमण्डनहीरस्य श्रीमद्बालकृष्णसुधियस्तार्तीयीकाधमर्ण्यदूरीकरणकृतलक्षणेन लक्ष्म्यम्बिकागर्भशुक्तिमुक्ताफलेन

"भोजभूपादपि ज्यायन् प्रभावः शरभेशितुः ।
प्रागेव दर्शनाद्वाणी प्रथते मादृशामपि ॥"

इत्यत्रभवत्प्रभावोन्मीलन् - मधुरवाग्विलाससनाथेन जगन्नाथ सुजन्मना शय्यासौकुमार्यहृद्यगद्यात्मकतया निबद्धं शरभराज-विलास नामानमेनं प्रबन्धं सारस्येन वात्रत्येन वात्सल्येन वा

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कवयितरि गौरवेण वा नेतर्याद्रियन्तामिह नियन्तारस्सदसतोः परगुणपरमाणोरपि पर्वतीकरणेन विलसन्तो जगति सर्वेऽपि सन्तः ॥

अवदधातु तावन्मन्दीकृत - दोलान्दोलन रभसमूकीभूत - शृङ्खलाक्रेंकार-कोलाहलं, क्षणमात्रविहित-व्यापारान्तरान्तराय-प्रसादं, आत्मप्रशंसेत्यकलितक्षोदाभावप्रकारं, आकर्णनानुग्रह-सफलीकृतकवयितृपरिश्रमं,

परिचिनुते निखिलकलां
निश्चिनुते तत्त्वमथ च तत्त्वम् ।
विचिनुत एव न दोषा-
नुपचिनुतेऽल्पमपि गुणमसौ शरभः ॥

इत्युक्तभङ्ग्या गुणैकग्राहकः ईदृक् प्रवाग्वचोऽमृत-पिपासुनोः - शरभनृप भवच्छ्रवसोः चित्तोपदंश-विधया चरितार्था भवतु मामिकाप्युक्तिरिति प्रार्थनापरतन्त्रान्तः करणः अशेषविद्या-निकषोपलायितमनीषाविशेषो मनीषितकल्पद्रुः अनल्पीकृत-श्रोतृजनहृदयोल्लासमात्मनो विलासं महाराजः ॥

श्रीमदुमारमणचरणसरोजपरिचरणप्रवणान्तःकरणषट्-चरणतासमेधमानप्राज्यसाम्राज्यलक्ष्मीकुल-गृहायमाणं, अनन्य-राज्याभिजन – सामान्य – मान्यभूमानमशेषजन – तपःसफली-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

करणपरपरमेष्टिवर–वलोद्वेजित–जगत्त्रय–पुरत्रय–दिधक्षादृत–प्रचण्डखण्डपरशु–दोर्दण्डाकर्षण–कुण्डलीभूत-मौर्वीकृत–दर्वीकर-कुलोर्वीरमण – फणावलिवालाग्रावनमितशिखरमूलदेशमिलित – नाकनागलोक – लोक कामनीयक विलेकनकलिकारभस – प्रचलित, सिद्धविद्याधरविलासिनीजनचरणालक्तक – रसमुद्रोन्निद्रकाञ्चनशिलाञ्चित सकलसानोः आरत्नसानोः सरसतरवलमानमलयगिरिपवमानतरलितविविधतटतरुषण्डशिखरसमुच्चल – त्कुसुमपरागपटलविच्छुरण ताम्रसलिल, ताम्रपर्णीपरिरम्भ – संभ्रम-समुज्जृम्भमाण-दक्षिणाम्भोनिधि समुल्लोल - कल्लोल-माला – स्फालनविघटितनिखिलशिखरिशिलाजालसन्धिवन्धात् आचसेतुवन्धादनुवेलावनमुदयदमृतकरकरपरिष्वङ्गसुखसमुत्त – रङ्गदुग्धोदतरङ्गोत्सङ्गसमुत्पतत्पयः सेक सुकुमारतर–तरुषण्ड–मण्डितनितम्बतलादाशैलादुदयनाम्नः अधित्यकाधिष्टित–सलिल राज राजधानीपरिसरोपवनवञ्जुलनिकुञ्जविहरन्मञ्जुलरूप-संपन्नकिन्नरमिथुनाङ्गीकृतसरससङ्गीतनिनत भङ्गीमुखरित–कन्दरोदराद् आ च धरणीधरात्प्रतीचस्सकलजनजेगीयमान-लोकोत्तर पवित्र चरित्र महिमानमतिकोसलराजवंशं श्रीमत्कोसलराजवंशमतीत्रगमितवतः समुन्नतिं अखिललोकमनोवशी-करणप्रगुणैः आत्मगुणैः सर्वस्मिन्नप्युर्वीवलये स्वयमेकराजतया-न्वर्थनाम्नः **श्रीमदेकमहाराजस्य** तनूजरत्न - रत्नहारमध्यनायकः सायक इव धर्मैकतान प्रवृत्तिः अनुवृत्तिपरः, पूर्वेषां अनुगुणं सद्म

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गुणज्ञताया, अनुरूपं स्थानमभिरूपभावस्य, समुचिता स्थिति-रुचितानुचितज्ञतायाः, स्वाश्रयः प्रश्रयस्य, जन्मभूः सौजनस्य, सुक्षेत्रं क्षमालतायाः, कुलमन्दिरं इन्दिरायाः, सर्वस्वं उर्वीः मण्डलस्य, सूत्रधारः कीर्तिनर्तक्याः, सीमा सौर्यस्य, भूमा धीरभावस्य, किं बहुना ? समष्टिरेव सर्वेषामपि गुणानां अविरलप्ररूढपुन्नाग – नार–नागानागरङ्ग – हिन्ताल – ताल– कृतमाल - तमाल - कपित्थाश्वत्थ - कर्कन्धु-पनस - प्रियालुप्राय-महीरुह निवहान्धकारितोपतट तटाकशतनिरन्तरपर्यन्तां अन्त-स्सञ्चरन्नवग्रहजाग्रदुदग्रतराग्रह - दुर्ग्रह - महाग्राह-सहस्रपरिग्रह-दुरवगाह्या जन्मभुवेन जलनिधीनां, प्रतिनिधिनेव नभोविभागस्य समुल्लोल-कल्लोल-हल्लोहल-विलोकनोन्मुखशाखा नगरनारी-जनवदन-प्रतिबिंबायमान–राजीवराजिविराजितागाध-जलौघया परितः परिघया परिक्षिप्ततया दुरधिरोहेणपरैः अत्युन्नता-ट्टालकघट्टाधिष्ठापितपरसैनिक-शतघ्नशतघ्नीशतदुरासद, नेदिष्ठ-सीम्ना, आरसातलाभिव्रिधिदुर्दर्शमूल शिलाबन्धावधिना विमल-तमरवेय (परिखा) जलान्तः प्रतिफलनद्विगुणायमानो-त्सेधेन कुलमहीधर· वप्रकारेण समन्ततः प्रकारेणोपगूढतया दुरवस्कन्दां, अनवलम्बदुर्गमतमाम्बरमार्गगमनश्रास्यदरुण-सारथिरथतुरगक्षणविश्रमविश्राणन क्षमतुङ्ग गोपुरशिखरां, जलावगादनिष्पतद् आपतत्समदराजघण्टारवदूरीकृत घण्टा–पथमूकभावां, दृढतर निखातसंकुललोह शंकुशत संकट

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विशंकट कवाट दुराघाटद्वारदेशां, अनवरतयुद्धश्रद्धा समुद्धृत-खड्ग-खेटक-शर-शरास-प्रास-मुसल-मुद्गरघनायोधनादि विविधायुधकरयोधसहस्त्रदुर्निरीक्षगुल्मशतदुराधर्षां, सर्वतस्समापतन्मनुजगजवाजिस्यन्दनान्दोळिकादि जात संमर्दविशालश्रृङ्गाटक-श्रृङ्गारिणीं, अश्वकुलशिक्षाविचक्षणसादि जनासादित नटनक्रम-चङ्क्रम-दुत्तुङ्ग-तुरङ्ग-पटल-चटुल-खुरपुट-चन्द्रकशत दन्दुरित-रथ्यान्तरां, अतिसुरभिचन्दनसलिलसमुत्क्षण समधिकशीतलेन परितः प्रकीर्णप्रसूनसौरभ लोभ परिभ्रमद्भ्रमरझङ्कारिणा समावद्धनवाम्रपल्लवतोरण सहस्त्रेण, निसर्ग-रमणीयामपि राजमार्गेण द्विगुणित रामणीयकां, अभ्रंलिह-वलभिव्यूह-समुच्छ्रित-पताकाशतचञ्चल, पटाञ्चल ताडन जर्जरित-निर्जरसरिज्जल वीचीनिचयनिश्च्योतमन्द बिन्दुवर्ष-निर्वर्तित गृहाङ्गण सेकक्रियां, अविरत-प्रक्रान्तक्रय-विक्रय-शालि विविध वणिग्जनप्रसारित, यावद्देशभव यथाभिलषित समस्त-पण्यवस्तुविस्तारप्रस्तारित विपणिसहस्त्र वैभवां, मृगमदघुसृण-घनसारपटवास कुसुमदाम समुद्दामगन्धभर सुगन्धिगन्धापणां, निजमुखकमल परिमल परिमिळन्मधुकरनिकर शङ्कावह कुन्तलभराभिः, समयसमुन्मिषत्कुवलयदलोपमेय - प्रसृतिमेय-नयनान्तोपगूढ कर्णोपान्ताभिः, अखिलकामिजन यावद्धन संवुभूषयेव पृथुभूताभ्यां कुचकुंभाभ्यां अवनमितमुष्टिग्राह्यमध्य-यष्टिभिरनुक्षणपरिगृहीत नैपथ्यान्तरमाकलित ललिताङ्गहारं

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

साकूतैरिवदृग्वलनैस्साश्वासैरिव वाग्विलासैः, सविस्त्रंभैरिव परिरंभ समागंभैः, सानुरागाभिरिव परोक्षवृत्तिभिः, सप्रेमभिरिव चेतःप्रवृत्तिभिः, सानन्दैरिव मन्दस्मितैः, समुपजातेनेव, विरहतापेन समुद्भूतेनेव वैक्लव्येनाकृत्रिमेणेव, चेटजनसंमाननेन सभक्तियोगेनेव उपचाराचरणेन च यावत्सर्वस्वापहारं प्रतारयन्तीभिः प्रसवशरैन्द्रजालिकमायावलविवशीभूतं विलासिजनमप्सरायमाणाभिः, मध्यमलोकस्य सकलभरतागमज्ञश्लाघनीय-सरसगीतलास्याभिः वारवारिजमुखीभिः अलङ्कृतवेशवीथिकां, अनवरतप्रवर्तमान विविध महोत्सव ताडित दुन्दुभि-मृदङ्ग-शंखपणवाद्यातोद्य निनादानुनादितगन्तरां, सोदरीमिव अमरावत्याः **तञ्जापुरीति** प्रतीतनामान्तरां राजराजइव सार्वभौमकुलनिवासोचितां अलकांनामनगरीं अधिवसन्, वसन्त इव सुमनस्संपत्करो, वासुदेव इव प्रियसत्योक्तिः, सौमित्रिरिव सुमित्रानन्ददायी, पुरुषोत्तम इति परिगृहीतः श्रिया, लोकेश इति समधिगतः सरस्वत्या, रत्नाकर-इत्यवलंबितो गाम्भीर्येण, भूभृच्चक्रवर्तीति बहुमतः स्थैर्येण, संपादितोऽनुकंपया, अनुपलब्धोलोभेन, समुत्सारितो मात्सर्येण, वर्जितोऽनार्जवेन, अननुरुद्धः क्रोधेन, दूरीकृतोदुरहन्तया, नाक्रान्तो वक्रभावेण अनुपचरितश्चापल्येन च ज्यायसा प्रकारैरपि सर्वैः **श्रीशाहमहीरमणेनोढ़** विश्वविश्वंभराधुरतया सुकुमारे, वयसि, कौमारे, समानवयोरूपकुलवलशालिभिः सह राजकुमारैः समभ्यस्तेन

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दृढसंहतमांसलावयवलघु समुत्थान महाप्राणतादि गुणाधायकेन, व्यायामविधिना वल्गितप्लुत रेचकित धौरिकितादिषु गति-विशेषेषु अस्खलितावस्थानोपलक्षितदक्षतया हयारोह शिक्षया ग्रैवेयकदामांतरप्रवेशितपादाग्रमाकलितेन, समुचित समय प्रस्तुत सुतीक्ष्णतर तोत्रप्रकारोपक्रमोपसंहारकौशलेन, मदोद्रेक विधीयमानेष्वपि चण्डशुण्डादण्डभ्रमणकर्णताळा-स्फालनजानुद्वयावपदनतिर्यग्दन्तघातगात्रविधूननाद्याडम्बरेष्वनु-त्पद्यमानसंभ्रमोद्वेगांगसन्धिबन्धशैथिल्यादितया परिनिष्ठितेन, गजस्कन्धाधिरोहश परिश्रमेण, उच्चावच वसुन्धरा-विभागाभिपतनावसरविहितरथ्याकुलप्रग्रहसंयमशिथिलीकर – णादि विधिविदितस्थैर्यया रथचर्यया दृढतरावद्धपरिकरमुप-न्यस्तापन्यस्तोपप्लुतावप्लुतोद्भ्रान्तादिषु विशेषेष्वनवस्खलित-पदविन्यासं उपरितिर्यगधः सर्वतश्च प्रविधूत दण्डयष्टि सावहित प्रतिहतावसरान्वेषिप्रतिकुमारदण्डधातमुपक्रान्तया दण्डक्रीडया समावद्धगोधाङ्गुलित्रमुपाहितद्वित्रनिषङ्गमारचितालीढ प्रत्या-लीढादिस्थानविशेषमटनिद्वयारोपिज्यं लस्तकविन्यस्तमुष्टि मुहु-राकर्षण कुण्डलीकृतकोदण्डमनपराद्धकाण्डविमोकं आकलितेन शव्दवेधिताधिगमपर्याप्त प्रवीण्येन उपासनेन च सकलकलोपदेश-नदीष्णदेशिकवरसान्निध्यमात्राधिमतेषु अनुप्रास–यमक–श्लेपा-द्युपश्लेपसङ्कटेषु छत्र–चामर–चक्र–ध्वज–गोमूत्रिका–खड्ग–नाग-पद्म-सर्वतोभद्रादिवन्धप्रतिवन्धवहुलेषु, एकद्वयक्षरपद्याद्युप-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लक्षितेषु अक्षर-बिन्दुमात्रार्धमात्राच्युतकगूढचतुर्थपादगतप्रत्या-
गत-पादार्धपादचतुष्टय श्लोकादि दुरवबोधेषु कर्तृसम्बन्धक्रिया-
गुप्तकादिचमत्कारिष्वपि प्रबन्धेषु अप्रतिहतप्रसरेण, सकृदा-
कर्णितभावावबोधसूक्ष्मेण, प्रतिभाविशेषेण, अनायासविहितैः
काव्यनाटकालंकारेतिहासाख्यानाख्यायिका प्रहेळिकाप्रभृतीनां
परिशीलनैः वीणावेणुमृदङ्गादि वादनाभ्यस्तिविलासेन च विहृत्य
अङ्कुरायमाणे च यौवनारम्भे, समुज्जृम्भितेन दिग्विजयोत्साहेन
प्रोत्साहितः स्तब्धीकृतकर्णद्वयमुच्चैः श्रवःश्रूयमाणहेषारवभीषण-
वाहव्यूह खरतरखुरपुटखण्डितक्षितिमण्डलोद्गच्छदुच्छृङ्खल-
धूलीनिकुरुम्बजम्बालिताम्बर कल्लोलिनीपूरं अनुवर्षारम्भ—
समुज्जृम्भमाणाम्भोदकदम्बस्तनित, डम्बरोपबृंहक बृंहित—
वितीर्णदिक्करि कर्णज्वरोन्मस्तक हास्तिक प्रौढपादन्यासभरा-
वनमित फणिराजमौलि पुराणदंष्ट्रिदंष्ट्राग्रकमठपतिपृष्टतटं
अमन्द, संक्रीडत्स्यन्दन सहस्रशिखरसमुच्छ्रितध्वजदण्डनिबिडित-
नभोमार्गनिरुद्धरविरथगतिप्रसरं, अनवधिवर्धमानयुद्धोत्साह-
नटदुद्भट भटपटलक्ष्वेलारवभरितभुवनोदरं, बलवदभिघात-
ध्वनदमन्ददुन्दुभिधणं धणितारभटी परिक्षुभ्यदुच्चलदेकीभव-
दखिलार्णवान्तरर्णःपूरमात्मरथ पथानुयायिनीं, भगीरथ इव
सुरतरङ्गिणीं, अनुकर्षन् चतुरङ्गिणीं, प्रस्थाय भञ्जयन्
भोजान्, हृतराष्ट्रस्सौराष्ट्राणां, दत्तातङ्कस्तङ्कणानां, परिहरन्
करधृतकङ्कणान् कोङ्कणान् दत्तावलंबः कम्बोजानां, प्रपन्नं

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अवन् अवन्तिराजं आकर्षन् कुन्तलान् 'तव स्म' इति वादिनः परिपालयन्नेपालान्, वञ्चयन् पाञ्चालान्, क्षोभयन् सिन्धून्, अन्धयन् भिया गान्धारान्, विहितभङ्गः पुनरङ्गानां, अनुकंपमाना लम्पाकान्, जर्जरयन् गुर्जरान्, प्रह्वयन् सिंहलान्, विद्रावयन् मद्रान्, तुच्छीकुर्वन् म्लेश्चच्छांश्च वशीकृत दिक्त्रयराजको दक्षिणस्यां च दिशि दुरहन्ताकुलं करटतटक्षरदनवग्रह दानधारानिर्झरमेदुरकरि शिखरि निरन्तरमुतरङ्ग – तुरङ्ग बलतरङ्ग परम्परादुस्तरं करतलवलगदफल्गुतरशस्त्रजाल जलचरसंकुलपत्ति सलिल कलिलं पाण्डचराजवलजलनिधि निजभुजदण्डाकर्षण कुण्डलीभूतात्कोदण्डमण्डलान्निस्सरद्भिः विशिखसहस्रैः विधाय, समाकुलं, निधाय च तत्र शरणापन्ने सेतुवन्धमासाद्य च दाशरथिरिव जनकनन्दिनीं जयश्रियं तदात्वविसृत्वरेण च असहाय दग्धप्रतिनृपतिकुलकाननतयाऽपहसता कृष्णपाण्डवबलप्लुष्टखाण्डवमाशुशुक्षणिं रात्रि दिवं प्रदीप्यमानतया चिरकालाप्रतिहतस्थिति स्थविरीभवदवधिगिरिवलय पाश्चात्य प्रदेशघनीभूत प्रभूततम तमःस्तोमलुंटाकतया, चातिशयानेनार्यमणमूरीकृत निजवशीकरणाडम्बर शंबररिपु-गर्व–सर्वस्व-निर्वापण–कुपितस्य समुज्जिहानेनेव कपर्दिनस्तृतीयाद्विलोचनान्निर्वर्तयतेव खेयकृत्यं बाणासुरपुरस्यालक्षीकुर्वता च बडवामुखविवरान्तरावस्थिति स्थितिमात्र परिमिततेजसमौर्वजातवेदसमाविर्भवतेव प्रौढतर झंझानिल निष्पेषवशेन

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जीमूतमण्डलात्समेधयता च विजितरिपुनृपहृदयेषु स्पर्शमन्धरा सन्तापं, प्रतापानलेन नीराजयन्निखिलदिग्देवतामुखानि समधिगम्य निजराजधानीं अतिचिरकालोद्वहनं श्रान्त इति समादाय भुवनभरमखिलं **श्री शाहमहाराजात्** तदानीमुपनतां अहर्निशमदभूयिष्टात् प्रभ्रष्टामिवदिक्करिकुलात् 'पाषाणहृदया' इति परित्यक्तकुलशैल सौहार्दां, पङ्करुचिरिति शङ्कमान—महावराह—संवासां, द्विजिह्वराज इत्युद्विजमानामहिराज समायणेऽति पुराणतया असमर्थ इत्यकलितकमठपतिपरिग्रहामवलम्बमानः स्वयमेकयेव सकलजगद्धौरन्धरीं पौरन्दरीमनुकुर्वाणोरीतिमार्जितं निजतात भुजाबलेन वर्जितमीतिभिरूर्जितमखिलेष्वपिराष्ट्रेषु अनवरत सेवा हेवाक[1] चतुर्मुख मुख निखिल बर्हिर्मुख कमलोदश्चदनिदंप्रथमवचःस्तुतिशत प्रस्तूयमानविश्वाधिक भावेन, उद्दण्ड दण्डधर कबलीक्रियमाण मृकण्डुमुनि डिम्भप्रियं, भावुकचरणाम्भोज पल्लवेन, पदकटक व्यक्रियमाण शब्दानुशासनेन, अमृतरसलिप्साविरचितैकमत्यादित्यदित्यपत्यनिकरकरान्दोलित मन्दरगिरिभ्रमिपरिभ्रमित क्षीरोदपूरोदरनिर्गत्वरसत्वरविसृत्वरभीकर हालाहलानल विहित दुर्दशचतुर्दश भुवनक्षेमङ्कर प्रक्रियेण, इन्दीवरारविन्दवृन्दजागरकलाविचक्षण वीक्षणद्वितयेन, निजशासन वशंवदीकृत-निखिलप्रपञ्चपञ्चशरपञ्चताकरणकरणायमान वीतिहोत्रपात्री-

---

1 desire

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भवत्तार्तीयीकनेत्रकमलेन, एक कलामात्रशेखरीकृतशिशिरांशुताकृतलक्षणेन, भगवता भवानी सहचरेण, शश्वदविमुक्तवदविमुक्तसन्निधानैः आलोकनमात्रकरबदरीकृतकैवल्यसंपन्निधानैः अनिदान्तनैः प्रतिपदमायतनैः शांभवैः पवित्रीकृतं परिसरे प्रवहन्त्या च जलक्रीडाकुतूहलावतरदभिनवयौवनमदमत्तचोलमत्तकाशिनीजनघनजघनस्तनाहतितरं[1]गदुत्तुंगतरङ्गरिंगत्कमल – कुवलयकल्हारदोलाविहारिमदकलकलहंससारसक्रौंचकारण्डव – रथाङ्गविहंगमकुलकल कल-कलमुखरित स्रोतसावासकसज्जिकयेवालङ्कृतयोपकण्ठ विराजमानैः अनेकगुणशालिभिः अग्रहारैः उपतटमविरलप्ररोह-वहलीभवत्कदलीतरु-पालि-पचेलिम-फलरस-पतनाम्रेडित-सलिल - स्वादिम्नाऽऽविरत - विधीयमानविविधक्रतु-कलाप-जागरूक, यायजूक संख्यावन्निरन्तर-निरवतासंख्यात यूपस्तंभसंभार संभासमानतीराभ्यर्णयाऽनेकजनुःशतसंगृहीत सुकृतशतपरिपाक समुपजात परिणति विषमविषयमिषविष-विषयक-हेयता-फलायमान तुरीयाश्रमविहिताचार समाचरणपर परमहंसयतिसनाथीक्रियमाणविपुलपुलिनाभोगधन्यया श्रीमत्या सह्यमहीधरकन्यया प्रतिपादित निखिलनदीमातृकनीवृदुपमानभाव निबिडतमशाखाशत परस्परानु – बन्धनीरन्ध्रछायपार्श्वद्वयसालवीथिका, शिशिरिताध्वसंपतद – ध्वनीनपरिषदननुभूयमान ललाटन्तप तपनातप तापातिरेकं

1 waving

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अतिचपलकपिकुलचङ्क्रमणचलितस्थलफलशालिनालिकेरतरु – षण्डान्धकारित ग्रामग्रामविकास सहस्रोपशल्यं कृषीवलकुटुंब संवध्यमान सारणीशतपथानुसारिपरितःप्रसारि ; मरुद्वृथावारि-पूरपरिपूरिताभोगैः, 'क्वचनजंवालितैः, क्वापि शंबाकृतैः, क्वचित् द्वितीयाकृतैः, कुचित्तृतीयाक्रियमाणैः, कुत्रचिद्बीजा-क्रियमाणैः, क्वापि च परिपाक पिञ्जरीभूत कलममञ्जरी-लोभसमाष तत्पतत्रिकुल-वित्रासन प्रपञ्चित मञ्चकाधिरोहशालि-शालिगोपवधूजन प्रस्तुताविगेय गेयरसानुभव क्षणविलम्बमान पान्थजन मनोहर पर्यन्तोदारैरभितः केदारैः अविरहिताखिल-प्रदेशमतिदेशममरलोकस्य, प्रतिमासप्रवर्तित श्रीहरिहरोत्सवा-दिदृक्षा समुत्सुक नानादिगन्तरागतचातुर्वर्ण्यनिर्वर्ण्यमान राम-णीयकं, प्रतिपदपरिकल्पित प्रपासंनिवेश प्रेक्षणीय वापी-कूप-तटाकोपान्त–नितान्त – निबिड, तरुतलच्छायरोमन्थायमाण-गोधनसहस्रसंकुलं, सुविहित गुप्तिक्रम-दुर्गम-जलस्थल-दुर्ग-दूरी-कृत कंटकोपसर्गमादेशमुत्तरकुरूणां, चोलदेशमनुशासद-प्रतिहत शासनः, स्मरशासन इव सर्वमङ्गलालङ्कृतमूर्तिरार्तिहरः प्रपन्नानां, मूर्त एवानन्दो बन्धुजनस्य, विग्रहवानुत्सवः, सत्समू-हस्यानुकूलं, भागधेयमुपजीविनां, चिरन्तनसुकृतपरिपाकः चोलविषयप्रजानां, विविध तपः फलं विबुधानां, जीवनकला-कविलोकस्य घनीभावः करुणारसस्य सुसन्तान इत्यर्थिभिः, मनसिशय इति महिलाभिः, दण्डधर इति द्विषद्भिरप्याकलितः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कलितस्त्रस्यतः, शरणं धर्मस्य, निखिल दिग्विभागनिवद्धैः उत्तालकर्णतालास्फालन संभ्रम समुद्भ्रमद्भ्रमरकुलझङ्क्रिया-नल्पजल्पाक गण्डमण्डलापादानदानजलधारा संपात जंवालित भूतलैः आलानशिलास्तंभससंरम्भाभिधात विषमित विषाण-कोटिभिः अतिवेल परिस्फुरत्पुष्करविवरोद्वान्तवमथुनिक-दुर्दिनायमानरथ्यान्तरैः, जलधरवृन्दैरिव भूतलस्याधिगतजङ्गम-भावैरिवजगतीधरैः जयकुञ्जरैः, निजसेवोपनतेन सदिग्गजेनेव दिग्वलयेनान्तः प्राकारेणवलयिते समुचितसमय सन्निधाप्यमान-प्रभूतयवयवससहर्ष, हेषमाण महाप्रमाण, वाजिवृन्दवन्धुर-मन्दुराशत सुन्दरोपान्ते, दृढघटित कालायस-कटकनिर्मितवर्म गोपायित मर्मभिः अस्तोक, शस्त्रवर,स्तवकितमस्तकैः, सतत-समुन्मिषत्सांपरायाहंपूर्विकैः आकृति विशेषैः इव क्षत्र धर्मस्य प्राप्त भवान्तरैः इव कुरु-पाण्डव-वलवीरैः करतल-विधूयमान-विविधायुधैः योद्धृयोधैः सांयुगीनैः जातसंमर्द**तोरणद्वार**वहि-श्चैत्यवितर्दिकाभागद्वये । देशान्तर नरपालप्रहितोपचारोक्ति विचित्र-पत्रिकाकलित-पाणिभिः, दूतशतैः अविनाभूत **प्राथमिक-कक्ष्यान्तरे** । निजनिजावस्थान स्थानस्थापितानि नातिसमुन्नता-न्यासनान्यलङ्कुर्वाणैः 'हुं' कुर्वाणैः सुरपतिमपि तेजसा 'किं कुर्वाणैरिह च' कार्तस्वरमय भाजन विनिवेशित महार्हमणि-भूषणांवर वहुलोपायनैः स्पृहणीय वेषालंक्रियैः निजशासनवशं-वदतयानुद्वेजितसीमान्तैः सामन्तमहीपतिभिः अशून्यीकृत**द्वितीय-**

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कक्ष्यान्तरे । क्वचिदखिल महीमण्डल संपन्न संपद्यमान संपत्स्यमान धान्यधनायव्ययगणनापरैः गणकवरैः, एकत्र च परचक्रदुराक्रम-पराक्रम-प्रक्रमैः सकृच्छस्त्र पातद्वैधीभवत्सारोहाश्व प्रथितहस्तसारत्यैः,अनवरत धनुर्गुणाघातजातव्रण किणाङ्कठोरीभूतप्रकोष्ठैः सेनानीभिः शान्तनवैरिव च सैनापत्येजातुचिदश्रूयमानपराजयैः शतशस्सेनापतिभिः, अन्यत्र च प्रजानुरञ्जनशील स्वामिचित्तवृत्यनुसारिभिः देशाधिकारिभिः, अपरत्र पुनरक्षुणपक्षपात सरणि मीमांस्यमान नयानयप्रवृत्तिभिः परलोकभीरुभिः अशेषस्मृति-पुराण-परिचय-पाटव-प्रविमलविवेकैः प्राड्विवाकैः, इतरत्र च निजनिजाधिकार जागरूकैः, आवश्यकैः राज्ञः सेवकैः संकुलीभूत तृतीयकक्ष्यान्तरे, अविरत –

गगनयात्वयासपरिजिहीर्षया प्रतिनिशीथसमयमाश्रित [1]गोपानसीकतया चन्द्रमसान्वर्थिनीभिः चन्द्रशालाभिः कन्दलितश्रीकैः, कपोतकुलकूजित[2]वदावदविटंकैः, स्वच्छतर सुधानुलेपधवलतया अपहसद्भिः ऐरावणकायकान्तिमासन्न दक्षिणांवुधिगत मैनाकगिरि विलोकनोत्कण्ठोपयानैरिव रिरिराजन्यशिखरैः प्रतिकृतिभिरिवस्फटिकाद्रेरतिविशालस्य नभसः पत्तनमाशंकमानेन पङ्कजासनेन विनिवेशितैरिव समन्तादुत्तम्मैः। शुद्धान्तसुन्दरीजनाभ्यस्यमानवीणावेणुमुरजरवप्रतिध्वनत्कन्दरोदभैः सोदरैरिव

---

1. गोपानासी The wood of bamboo frame work of a Thatch
2. वदावद speaking much.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दुग्धोतरङ्गधौत शिलाजालस्य मन्थानाद्रेरतिविमलप्रसादैः । परिष्कृताभ्यन्तरे प्रासादैः प्रतिप्रतिहारगत प्रतिहारिजन वेत्रलताशतदुष्प्रवेशे कुतुकसङ्गृहीत कुब्ज,–वामन,–किरात,– बधिर,-मूक,-पङ्कुप्रायजनगतागतदर्शनीयेन वर्षवरप्रायपरिजन-बहुलेन, धात्रीजनकरावलम्बसञ्चरमाणराजदारकचरणरण – न्मणितुलाकोटिशिञ्जानमञ्जुकुट्टिमतलेन, सरससखीजन – सल्लापपल्लवितसमयक्षेपप्रकारमतिविनीतवदासीनदासीजन – संवाह्यमानचरणसरसीरुहं वासगृहपर्यङ्कावस्थितिमात्र व्यापारैः उदाराभिजनप्रसूतिभिः । दापयशुकवाणि ! दाडिमीबीजानि शुकशावकेभ्योऽनुवद मेधाविनि ! मधुरं शारिकावचांसि, कलय कलकंठि!, सल्लापं सहकलकण्ठ कामिनीभिः, ताण्डवय, घनकेशि! करतालिकाभिः शिखण्डिकुलानि, विकिर कलभाषिणि ! मणिशिलाशकलानिकलरवेभ्यः, प्रदिश कुरङ्गाक्षि ! नवदूर्वा-ङ्कुरान् कुरङ्गतर्णकेभ्यो, नन्दनय चन्द्रमुखि ! स्मितचन्द्रिकया-चकोरनिकरान्, शिक्षय सरसानि गतानि चारुगामिनि ! कलहंसान् विरचयालिंगनादि, तुङ्गस्तनि! गृहाङ्गण कुरवकादि-भ्यो, निषिञ्च, प्रियनवमालिके ! सलिलैः नवमालिकां, निगुंभ कुंभकुचे ! विचित्राः कुसुमस्रज इति मनोहारैः आलापैः, व्यापारयद्भिः, परिचारिकास्सोदरीसमुचितां वृत्तिमाचरद्भिः, सपत्नीष्वपि तनयाविशेषसंभ्रियमाणभृत्यवर्गैः, हेतुभिः त्रिवर्ग-फलप्राप्तेः, गुरुजनवश्यैः, असूर्यंपश्यैः, अनुपमलावण्यगुणोदारैः,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अलङ्कृताभ्यन्तरेण राजदारैः, शुद्धान्तेन सिद्धान्तितकान्तभावैः, कुसुमशरशरसहकारक्षमसहकारतरुकिसलयास्वादकषायकण्ठ - कुलकण्ठकुल प्रपञ्चित पञ्चमध्वनि वाचालितदिगन्तरेण स्तनित-भ्रमाधायकान्तर्गृहध्वनन्मृदंग, मन्द्रध्वनि समारब्ध नटनकेकि-कुटुम्बकेकारवो, चित्रकदम्बतरु कदम्बशालिना परिणाम विद-ळित फलभरजिघ्रत्सा समुत्सुक शुकनिकराहं - प्रथमिकाविवाद वावदूक दाडिमीकेन, क्षितितलाव नम्रशाखानुषंगि लवङ्गवल्ली-पल्लवग्रासलोभानुसारिशारिकानिकायकाकलीनिनादनान्दी - करतक्कोलशिखरेणामूल चूडोद्भिन्न सरस किसलयाञ्चित नागलतोपगूढक्रमुकतरुदाम्पत्यरमणीयेन, कुशल, मालाकार विरचित, समुचित,दोहदप्रकार समुद्भवदक्षुद्रभावलसद्द्राक्षास्त-बकावनम्रमण्डपशतमण्डितेन, समयसमुन्मीलत् कुन्दमन्दारादि-तरुबृन्दकुसुमस्यन्दमानामन्दमरन्त रसपिपासा मिळन्मिळन्द-सन्दोहझंक्रिया हुंक्रियमाणपथिक वधूजनेन अतिविमलस्फटिक-शिलोत्पादनक सोपानपरंपरा सुगमतीर्थ चतुष्टयाभिः, स्वच्छ-शिशिरस्वादु सलिलाभिः, विलोलतरोर्मिमाला समुल्लङ्घ्यमान कूलाभिः, विकसितविविधजलरुहप्रसून विहरत्सलिल विहग निवहविरुतविनिद्राभिः, अतिदीर्घतताभिः, उपशोभितेन दीर्घि-काभिः, विश्रामभुवेन नन्दनोद्यानस्यापि, अपरेणेव चैत्ररथेन यौगपद्योन्मेष विहित संकेतैरिव षड्भिरपि सततमृतुभिः, सनाथीकृतेन, सकलेन्द्रिय पश्यतोहरलक्ष्मीकेन, कुसुमशर-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

केळिलालस प्रमदाजन प्रमदावहेन, प्रविभासमानेन प्रमदावनेन, न्यासैरिव सुवर्णाचलस्य, निधानैरिव निधीनामपि, नवानां सुसमृद्धेन द्रविणराशिभिः भूषापेटकेनेव भगवत्या रत्नगर्भया-निर्यत्नोपचित सकलजगतीगत तत्तज्जात्यरत्नमहनीयेन कमनीय-तमप्रदेशान्तरे कोशागारेण प्रतियामं अभिनवसन्निधाप्यमानया-मिक स्तम्बेरमतुरङ्गम सङ्कुले वैजयन्त इव जयन्ततातः, स्वच्छन्दमानन्दन् श्रीमतिराजकुले राजराजेऽप्यसंगृहीत किन्नर-वर्गो, जिष्णुरप्यकृतगोत्रभेदनो, जीवनप्रदोऽप्यनाकलित जलधर-भावः, कुवलयापीडोऽपि कंसारिप्रसादास्पदः, कलानिधिरपि मितोदय समुपजायमानरुचिः, व्यत्यासः कात्यायनीपतेः, विनिमयो दैत्यारातेः, वीप्साविबुधाचार्यस्य, विभाषा शेषाहेः एकीभवनमष्टदिगीशानां, ऐकरूप्यमश्विनेययोः, पुंभावः सरस्वत्याः, पर्यायः पृथुचक्रवर्तिनः, परिणतिः पृथासूनोः, विवर्तः कार्तिकेयस्य, नामभेदो रामचन्द्रस्य गुणनिका गङ्गात-नूजस्य उपमानमौशीनरेः, दृष्टान्तो दशरथ क्षितिपतेः, अहर्दिवं च परिणतिं उपयातेन पद्मबन्धुगर्भेणेवपाण्डरायमाणे प्राचीमुखे, आप्रभातमम्बराजिरेविहृत्य सहप्रेयसीभिः प्रस्थिते स्नातुमिव प्रतिपत्यश्चमपांनिधिं, भगवति द्विजराजे तदुपभोगमृदितेष्विव परिम्लानतामुपायातेषु, पारावतकुलधूसरछविषु तारका-कुसुमेषु, सुचिरप्रोषितनिजरमण समागमाध्यवसाय मुदितास्विव प्रफुल्लमुखकमलासु, पद्मिनीषु, प्रथमोदितेन अनूरुमान्त्रिकेण

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

समुत्सारितैः दुर्निग्रहैः सन्ततमसंग्रहैः ईषदुद्ध्वंसन्तीनां दिगङ्ग-नानां निश्वासमरुतीव मन्दं मन्दं अवलंवमाने प्राभातिके पवमाने सरभसमुपेत्य मितश्चञ्चूपुटचुम्बनादिनाजहत्सु च दुस्सहतमयामिनीविरहानलसन्तापं कोकमिथुनेषु परिणतम्.

प्रातर्नवेतिविविदिषोर्वल्लभस्य भाविविरहाशङ्कयानिह्नु-वानासु हारलांशयनीयाधस्तात्प्रौढमहिलासु प्रतिकुलाय मवबुध्य! विरुवत्सु, विहङ्गकुलेषु, कुर्वत्सुकलकलं प्रासादविकटङ्कगतेषु कपोतपोतकेषु, कूजत्सुकलं पञ्जरगतेषु शुकशारिकानिवहेषु, निवासयष्टिगतेषु च विसृजत्सु केकाः कलापिषु 'क्रें' कुर्वत्सु, तारतरं भवनदीर्घिकासारसेषु क्षीरोदवेलावनाशोकस्तबकाय-माने च भूषयति । पद्मरागमणाविव पूषणि मौलिमुदया-चलस्य निजसेवावसरागातैः प्रातिबोधिकैः वन्दिमागधवेतालिकैः प्रस्तुताभिः पुण्यश्लोकनृपचरित्रगाथाभिः श्रुतिसुखैश्च माङ्गल्या-तोद्यनिस्वनैः प्रतिवोधितोध्यायन्नन्तरिन्दुचूडचरणारविन्दं नम-स्कुर्वन्, गर्भगृहाङ्गणगतां सवत्साङ्गां आलोकयन् प्रेयसीजन वदनदर्पणं, सौरवप्रसुप्तिकैश्च अभिनन्द्यमान प्रवोधः, प्रिय-सुहृद्भिः, उत्थाय सुरकुञ्जर इव मन्दाकिनी सैकतात् विलुलित-प्रसून संस्तररमणीयाच्छयनीयात् विरचितसमुचितव्यायाम-विधिः अधितिष्टन् स्वास्तीर्णकौशेयपटसुखस्पर्शं हाटकमयपीठं तत्कालसन्निहिताभिः, अभ्यङ्गमङ्गलकुशलाभिः, काञ्चीदाम-

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दृढसंयमितपरिधानीयांशुकमधरपल्लव - विधृतकुचोत्तरीयाञ्चल-मवटुतटवलयितवेणीलतिकमपरभागलम्बितहारयष्टिसन्नद्धाभिः, काञ्चनमयचषकावस्थितं व्याकोचकर्णिकारस्तबकसंभृतं मधु मधुकरीभिः इव आददानाभिः, कुसुमतैलं,परिवारवारिज – मुखीभिः, अतिरभसप्रेङ्खितमणिताटङ्ककिरणमण्डलधलधलाय-मानगण्डस्थलं परिश्रमजनितैः,प्रस्वेदबिन्दुभिः, युगपदङ्कगताभिः, ताराभिरिवविभूषितवदन – शशिबिम्बमवपतदवतंसनीलोत्पलं घर्मोदकसेकसंसक्तोत्तरीयदुकूलस्फुटोपलक्ष्यमाणकुचकलशमुत्त – रङ्गिततिवलितरङ्गमतिशयभुग्नवलग्नभागं मधुरक्वणत्करकङ्कण-कटिकिङ्किणीकमभ्यज्य घनघनसारागरुतक्कोलपरिकल्पितेन, सुवर्णचूर्णमिश्रणपिञ्जरेण, यक्षकर्दमेनोद्वर्तितोज्ज्वलाङ्गो जाम्बू-नदमयकुम्भशतसंभृतैः प्रविकीर्णपाटलीकुसुमसुरभिलैः सुखोष्णैः, सह्यजासलिलैः, सुस्नातः, परिधाय च अनाहते वाससी सुविहित-श्रीचन्दनानुलेपनविधिर्मण्डयन् छायामण्डपाभ्यन्तरं तदवसरा-वश्यकसन्निधानैः सौस्नातिकैः भुवमतीर्णैरिव भानुमद्भिः भासुरैः ब्रह्मवर्चसेन, भूसुरैः, महानुभावैः, 'स्वस्ति भवतेऽवते धर्मेण जगन्ति । वितरतु श्रेयांसि शाश्वतिकानि तेविश्व-निगमौघजोघुष्यमाणविश्वाधिकमहिमा हिमाचलकन्याकवचित-वामकळेवरो भगवानष्टमूर्तिः तरङ्गयतु तवमङ्गलमभङ्गुरम् । सर्वदा सर्वमङ्गला गोपायतु निरपायमवनिरक्षणशक्तिमत्तभवा-नक्षय्यतेजश्रीरंबुजाक्षः आनन्दतु स्वच्छंन्दमरविन्द इव

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मन्दिरेऽस्मिन्नमन्दमिन्दिराप्रकल्पयतु कल्पशतायुरनल्पगुणानि निजानुकल्पान्यपत्यानि सत्यलोकस्वामी, नरीनर्तु च नर्तकीव जिह्वारङ्गे विधिकुरङ्गेक्षणा, निर्मातु कर्मसाक्षी वपुषि नीरुजतां नीरजबान्धवः, द्रढयतु प्रौढमैश्वर्यं निविडौजास्तव विडौजाः, व्यनक्तु नक्तन्दिवमप्रतिहतशक्तिः शक्तिपाणिराजौ विजयं, समेधयतु सुरपुरोधाः पुनः अनितरसाधारणं धारणातिशयं ननु सिद्धसाधनमेधिषीष्टसर्वोत्तम इति पिष्टपेषणं किल? 'पुषाण पुत्रनिर्विशेषं प्रजा' इति अनुवादः पुनः, अनुगृहाण प्रपन्नानिति पौनः पुन्यमेव, याहि सता-पथा इति पौनरुक्त्यं हि, जहि मृधे शात्रवानिति आभीक्ष्ण्यं खल्वनुवर्तस्व महतः इति क्रियासमभिहारोऽथशाधि विमार्गयायिन इति समधिगताशास्यसर्वस्वस्य किं अन्यदाशास्महे, केवलं राजीवजन्मेव जीव चिरायेति" प्रयुक्ताः विहिताञ्जलि प्रतिगृह्याशिषो मुहुराम्रेडितश्रीमत्पञ्चाक्षरीको भृशमेकतानीभूय दृढभक्तियोग–कलास मुद्घटितहृदयपुण्डरीककोशाकाशान्तरविस्फुरत्सहस्रांशु सहस्रभास्वरभगवच्चन्द्रमौलिचरणारविन्दमानसिकसपर्याकन्द–लितं अनुभूय महान्तं अन्तरानन्दं अञ्जलिपुटकलितैश्च काञ्चनकुसुमैरवकीर्य देवायतनगतं श्रीमतः शर्वाणीसखस्य स्फाटिकं लिङ्गं, अवलोक्य च तपनीयमयभाजनगते सर्पिषि, प्रतिबिम्बमात्मनो नैत्त्यिकैश्च वितरणादिभिः अयातयामीभूते यामद्वये सुदूरगगनाध्वपतनश्रमपिपासितान् पाययितुमिव

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्यन्दन–तुरङ्गमान् मन्दाकिनीसलिलं मन्दायमानगतौ भगवति मरीचिमालिनि, चण्डातपतापभियेव सञ्चरितुं बहिः असंमन्यमानेषु पवमानेषु निरीक्ष्य तेजस्विनं असूयया दुर्जनहृदयेषु इव प्रज्वलत्सु स्फटिकग्रावसु उपचीयमानास्विव विपक्षजनलक्ष्मीषु दुष्प्रेक्षासु दशस्वपि दिक्षु विहाय सरोजलानि समाश्रयति, प्रौढतरुणीकुचकुंभतटानि जडिमनि महीरमणेष्विव उद्दण्डपुण्डरीकातपत्रच्छायाश्रितेषु कलहंसकुलेषु कुम्भशत सङ्ग्राह्यैरिव आतपोष्मभिः नखंपचासु पदवीषु सञ्चरणाक्षमैः सममध्वनीनैः आश्रयन्तीषु वृक्षमूलानि छायासु प्रासादगर्भप्रतिध्वनिभिः देवतागृहशङ्खनिर्ह्लादैः विबोध्यमान इवाभ्यवहारवेलां प्रविश्य गृहाभ्यन्तरं तत्र च सत्वरं आरालिकजनकरावर्जितेन नात्युन्नतत्रिपदीकपीठाधिष्ठापितसौवर्ण[1]स्थालान्तरस्थितेन तत्कालसमुचितावस्थिभिः चकोरादिभिः अविक्रियमाणतया आशङ्कनीयेन सविधगतैश्च अदः पथ्यमिदं लघुतरमेतधुना सुभोजमिति अनुमोदितेन भिषग्वरैः अन्यूनानतिरिक्तपाकस्वादुनाप्रभूतमांसारुच्यव्यञ्जनेन भोज्यजातेन स्वच्छसुरभिणा लघुशीतलेन च पानीयेन सुविहितसौहित्यविधिस्तपनीयमय[2]स्थगिविनिहितेन सगौ खदिरेण, कर्पूरकङ्कोललवङ्गैलाजातीफलसुगन्धिनाविच्छुरितमौक्तिकचूर्णैः परिकलितसौवर्णपर्णैः तत्सवर्णैः

---

1. स्थाल — Plate, dish, cup etc.
2. स्थगि—a box (for betel)

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ताम्वूलीदलैः सरसचिक्कणैश्च क्रमुकैरुपकल्पितेन, ताम्बूलेन अनुरञ्जितमुखकमलः परिजनकरावलम्बी पुरःप्रस्थितेन करकलितकनकवेत्रलतिकेन कञ्चुकिना आदिश्यमानवर्त्मा समासाद्यस्वच्छतमसुधानुलेपनावदातभित्तिभागं,अभ्रङ्कषशातकुम्भस्तम्भशतसमुत्तम्भितं अत्युच्चतयावतंसयन्तमिव शीतांशुमण्डलं, अवलम्वमानमिव निखिलमम्बरं, आस्तीर्णचित्रकम्वलसुखोपवेशमणिवेदिकाकुट्टिमं, अनेकविधेहामृगमनोहारिनिस्तुलतुलोद्भासितं, अतिकुशलकारुवर, विलिखित, विविधचित्रशताञ्चितवितानांशुकविचित्रितोर्ध्वभागं परिसरसरस्तरङ्गशीकरनिकर परिचयशिशिरितेन प्रमदवनमारुतेन, प्रवितन्यमान–प्रेक्षकजनहृदयोल्लासं **कृष्णविलासं**, कदाचन सभान्तरं वा तदभ्यन्तरभागालङ्करणालंकर्मीणां प्रलम्वजाम्वूनदमय शृङ्खलिकाचतुष्टयावलम्बिनीं टंकदळितशशाङ्कमणि–शिलाशकल–सहोदरैः प्रतिमासमुपसङ्गृहीतैः इव द्वितीयाचन्द्रखण्डैः[1]कलादजन श्लक्ष्णीकृतकलधौतपट्टविशदैः करिदन्तशकलैः सङ्घटितां, पर्यन्तलम्बमाननिर्मलनिचोळपटावगुण्ठितमृदुकुमारकुथावस्थापितमहार्होप – वर्हसंपन्नभागत्रयां, प्रतिमासुधांशुरिव क्षीरोदलहरीं, परिजनकरान्दोळन[2]प्रेङ्खोळितां परिष्कुर्वन् प्रेङ्खेलिकाम्

अत्रान्तरे च सविनयं प्रणम्योपसृतेन सन्निधित्सन्ति– सामाजिकाः । संजिगमिषन्ते सवयसः प्रविविक्षन्तिप्रधानानि

---

1. कलाद– Goldsmith· 2. प्रेङ्खोलित—moving to and fro

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दिदृक्षन्ते समयप्रतीक्षाः सामन्तक्ष्मापतयः सिषेविषते सेवकलोकः शुश्रूषन्ते निदेशाक्षराणि देशाधिकारिणः पिपृच्छिषन्ति सांशयिकाः स्वयमक्षदर्शकाः प्रदित्सन्ति पत्रिकासंपुटान् देशान्तरागता दूताः, लिलिखिषन्ति प्रत्युत्तराण्यक्षरचञ्चवः, पिपठिषन्ति पौराणिकाश्चिक्कवयिषन्ति कवयितारो; जिगासन्ति गायकाः तुष्टुवन्ति स्तुतिपाठकाः ; निनर्तिषन्ति नर्तक्यः, वितितंसन्ति विनोदान्वैहासिकाः जिगमिषन्ति, सर्वतः-स्पर्शाः प्रणिनंसन्ति च प्रकृतय इति विज्ञाप्य लब्धानुज्ञेन द्वारस्थेन प्रवेशितैः अशेषैरपि तैः यथोचितमुपास्यमानः परितः प्रसृमरैः मणिशिरोभूषणप्रत्युप्तयोः मरकतयोः अभिनवदूर्वाङ्कुर-च्छविदायादैः अंशुभिः हरितायमानेन विविधवर्णकुसुमापीड-शालिना अंसतटप्रलम्बिमौक्तिकगुच्छेन, पुष्णता भृशमुत्तमाङ्ग-श्रियं उष्णीषेण कनकमयेन शिखरोदितबालारुणमण्डल इव उदयगिरिः, आप्रपदीनेन च निष्कलङ्कैः निजगुणैरिव निर्मितेन, अन्तरान्तरासु विहितसौवर्णद्रवस्थासकचित्रितेन, गिरिराज इव विकसितकनकारविन्देन मन्दाकिनीस्रोतसाऽतिविशदेन, वारबाणेन विभ्राजमानमूर्तिः, प्रणयकलहकोपप्रशमविहित-प्रणामविधिलग्नरोहिणीचरणनवयावकरसस्थासकेनेव अष्टमी सुधांशुना हरिचन्दनविन्दुविशेषकबन्धुरेण ललाटेन, सुजाततया धर्मभीरुणेवानुल्लङ्घितश्रुतिसीम्ना कटाक्षचुम्बिन्याः श्रियो मुखकगलताम्बूलरससंसर्गादिवारुणितापाङ्गेन, परिणतजम्बू-

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

फलमेचकतरलया कनीनिकया भ्रमदळिनेव तामरसदळेन लोचन-युगळेन, विमलतरकिरणजालविच्छुरितकपोलमण्डलाभ्यां, पृथुल-बदरीफलस्थूलाभ्यां, शशाङ्कबिम्बशङ्कागताभ्यां इव पुनर्वसूभ्यां कर्णकुण्डलमुक्ताफलाभ्यां च विराजमानवदनारविन्दो, मध्य-न्दिनदिनमणिमयूखभास्वरैः मुष्णता मरीचिभिः चक्षूंषि, पश्यतां परिष्कुर्वाणेनेव कण्ठं वैकुण्ठस्य महता मुक्ताफल-ग्रैवेयकनायकहीरेण विडम्बयन् स्यमन्तकमणिशालिनं सत्रा-जितमखिलभुवनगृहरक्षणकवाटफलकायमानेन केलिसौधतलेनेव साम्राज्यश्रियः प्रभवभुवेव परीणाहस्य समुन्नद्धेन वक्षसा च आलोकयितुमिव आत्मसौष्टवमवलम्बितजानुमुकुराभ्यां भज-मानाभ्यां इव शयनीयभावं अच्युतस्य उद्दामाभ्यामिव अमलकरकमलनखकिरणव्याजेन नवमदमालानस्तम्भाभ्यामिव श्रीभूकरेणुकयोः वृत्तमांसलाभ्यां बाहुभ्यां च अध्यवस्यमान-सकललोकोद्वहनसारः, समाक्रान्तनिखिलमहीभृन्मौळितयेव जात-शोणिमचरणपल्लवतलः प्रबलतरनिजभुजबलबलवदभिविधिपरि-गतनिरवधिकभयसमधिकचकितसकलरिपुनरपतिकुलसविनय — विनमितकनकमयमकुटतटघटितनिरुपमविविधमणिगणविसृमर - विमलतमकिरणनिकरबहळशबळितसविधनिहितमणिखचितपद - कमलपीठः, ऐकरूप्याभावतया नासत्यौ अनङ्गतया च मकरांशमपहायाश्रितेन स्वमेव लावण्यातिशयेन न्यक्कुर्वन्, नलकूबरं जयन्, तमपि जयन्तं असकृत्परिशीलितदण्डनीति-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

निर्विचारप्रवर्तितराज्यतन्त्रैः, अतिदुर्घटकार्यशतघटनापटुतरशेमुषीकैः, कुर्वद्भिरिव आचार्यकं अमरपतेः, मृदुतरकरादानसुरक्षितप्रकृतिभिः, सुसंभ्रियमाणधान्यधनकोशैः, यथोचितसमयप्रतिपाद्यमानवेतनसान्त्ववचनादिसुसमाहितसैनिकैः, फलानुमेयपड्क्षीणषाड्गुण्यैः, अनवरतवितायमानविविधसप्ततन्तु – प्रणीतवैतानिकवीतिहोत्रवषट्कृतपवित्रपुरोडाश–प्रसरत्पुण्यतर - परिमळाघ्राणनप्रमुषितकल्मषैः, महाकुलीनैः, स्वनुरक्तैः, स्वामिन्यनुक्तहितकारिभिः श्रीम**दानन्दरायय**ज्वमुखैः अमात्यप्रमुखैः उदुह्यमानभुवनभारतया करणीयान्तरमपश्यन्, कदाचित् सकलकला – कलाप – कलानिधिभिः असकृदनधीतव्याख्यातनिरवद्यनिखिलविद्यावैशारद्यसमुद्यदुज्वल – कीर्तिहारलतावितरणानन्दितदशदिगङ्गनाजनश्लाघास्पदमहाप्रौढिभिः पश्यद्भिरिव पदेन न्यायतन्त्रे, शृण्वद्भिरिव चक्षुषा, पाणिनीये, समुद्धवद्भिः इव पुलिनान् मीमांसा – द्वितये, रचयद्भिः इव रामायणं, कथयद्भिः इव वृहत्कथां, कवयद्भिः इव च काव्यानि रघुवंशादीनि, कवनप्रौढिमनि निजवदनारविन्दनिरर्गळ-निर्गळितहृद्य-गद्य-पद्यमयनाटकादिदिव्यप्रबन्धशतानुबद्ध-रसमधुमधु - रिमसम्पन्मितंपचीकृतसुरसुरभिस्तन्यादियावन्मधुरवस्तुमाधुरी - कैस्साकं विद्वत्कविभिः चिरपर्युषितमित्यस्पृशन्त्याः पीयूषरसं, मधुपकुलैकस्पृहणीयमिति निन्दन्त्या मकरन्दं अम्लतयाप्रथममवमन्वानायाः [1]मृद्वीकां आद्यन्तनीरसत्वात् अधिक्षिपन्त्याः

1. मृद्वीक—a bunch of grapes

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

पुण्ड्रेक्षुं मक्षिकालीढमिति निरस्यन्त्या माक्षिकं अविरल-स्यूतदरहसितनववकुलकुसुमसरससुरभिसुकुमारसन्दर्भाया: कुरु-पाण्डवतुमुलोच्चचण्डगाण्डीविमुखमरुदाध्मातदेवदत्तमुखो दित्वर-घुमघुमघोषगम्भीरया निजमुखकमलान्निस्सरन्त्या: भारत्या: शरीरकान्तिभिरिव स्मिताङ्कुरैः पाटलिताधरपल्लवं पल्लवयन्, सल्लापकौशलं अन्तरान्तरा च कामप्युक्तिचमत्कृतिं, किमप्या-विष्कुर्वाणाय कस्मैचिदप्यगोचरेण गिराम् अविश्रान्तेन विश्राण-नेन आमध्यन्दिनवदान्यतया राधेयस्य, व्यर्थप्रदत्तया चौशी-नरेर्द्विजिह्वोपकारितया जीमूतवाहनस्य, परिग्रहशीलतया दधीचे:, पदत्रयमितधराशकलप्रदातृतया वैरोचने:, चिन्तनापेक्षि-तया च चिन्तामणिप्रभृतीनां, क्वापि अलब्धोपमानं अवनी-पकीकृतावनीमण्डलतया निर्व्यापारमनुगुणीभूतकरीन्द्रविश्राणनं सहजीभूतशिविकाप्रदानं, हेलायितहयवितरणमविषयीभूत-रत्नाम्बरादिस्पर्शनं, देवस्वतयेव अनभिमतसुमेरुप्रतिपादनं, आत्मनैव विस्मापयन्नात्मनो वादान्यकं जातुचिदपि स्फुटवर्णो-च्चारणपदविच्छेदान्वयसन्दर्शन–तात्पर्यप्रकटनादिजनित – श्रुत-मात्रार्थबोधताश्लाघनीयत्वरितपठनधाटीकैरवतारान्तरै: इव रौमहर्षणैः वाच्यमानानां पौराणिकै: पुराणरामायणेतिहासा-दीनां श्रवणेन कृतार्थयन् आत्मानं अशेषानपि सभास्तरान् समयान्तरे च सरभसव्यापारितकरयुगझणझणायमानमणिवलयं, मार्दङ्गिजनास्फालितपुष्करोद्गतवरैः घनघनाघनस्तनित भ्रम-

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नर्तितशिखावलमण्डलैः सुरासुरमथनसंरम्भविघूर्णमानदुग्धार्णव-कल्लोलान्दोलितमन्दरगिरिकन्दरध्वानधीरैः मृदङ्गध्वनिभिः, अनुनादितास्थानमण्डपाभ्यन्तरं अतित्वरितताळावचरपाणिद्वय-घट्टनक्वणद्दुत्तालताललयानुगतं वैणिकवरकरकनककोणव्यापार-प्रक्वणद्वीणागुणविकस्वरस्वरसप्तकप्रगुणितश्राव्यभावं मुख-मरुदापूरणकुशलकुशीलवजनकराङ्गुळीदळविवृतसंवृतसुषिर – शालिमधुरतरमुरलीरवतरलीकृतजनमानसं, कोकिलगलनिर्गल-त्काकलीरवानुकारिवारविलासिनीजनकण्ठकम्बुनिर्यत्कलध्वनि–मनोहारं भूवलयमिव विलसत्सौराष्ट्रसौष्टवं, बलिसद्मेव भूयिष्ठ-शङ्कराभरणं, देवार्चनप्रारम्भमङ्गलमिव समुदयमानघण्टारवं प्रातस्त्यपूर्वदिगङ्गनामुखमिव रमणीयोदयरागं सफलीकुर्वन् आकर्णनेन सङ्गीतकं अवितथीकृतदिवसव्यापारो विहरन्त्याः सुरवर्त्मनि सुरसुन्दर्याः, करकमलपरिभ्रष्ट इव कुरुविन्दमणि-कन्दुके, प्रबलतरकल्लोलारभटीवशविक्षिप्त इव मन्दाकिनी-जलकनककोकनदे वरुणदिग्वधूताटङ्कायमाने चुम्बितचरम-गिरिनितम्बमम्बरमणिबिम्बे, अतिप्रवयसो वासरश्रियः कर-तलनिपतितादस्तगिरिशिखरशिलासङ्घट्टनविघटितात् मिहिर-मण्डलकनककरण्डकात्समन्ततो विप्रकीर्णेनेव सिन्दूरक्षोदेन सन्ध्यारागेण शोणायमाने प्रत्यङ्नभोविभागे अटित्वा दिवसमखिलमाशान्तराणि समाश्रयत्सु तरुशिखराणि समं तरणिकिरणैः विहङ्गमकुलेषु परिम्लानश्रीकं अर्थिजन इव

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

परित्यज्य पद्माकरमुपयति मधुव्रतचक्रवाले समुदयमानं कुमुदाकरं, निजरमणवियोगानल-विदीर्णहृदयायाः, कुचयुग इव नलिन्या विघटमाने रथाङ्गविहङ्गमिथुने वलति च प्रफुल्ल-मल्लिकाजालमकरन्द-शीकर-परिचयजातजडिम्नि मन्दं मरुति प्रादोषिके निजरमणमभिसरन्त्याः रजन्याः अवगुण्ठनपटेनेव प्रौढतमतमालपल्लवश्यामलेन, जगदन्धङ्करणेन मुष्टिग्राह्येणा-न्धतमसेन आच्छाद्यमाने दिक्चक्रवाळे विहरिष्यमाणस्य निशापतेः समुत्क्षितैः चन्दनविन्दुभिरिवोडुभिः निबिडिते सुरवर्त्मनि प्रयतमानासु च अलङ्कृतये वासकसज्जिकासु समुद-यति च क्षुभितपान्थकृशोदरीजनकोपारुणकटाक्षपातैरिव लोहितायमानमण्डले भगवति कैरविणीकामुके, अश्नुवाने च भुवनोदरं सायं दुन्दुभिध्वनौ तदानीन्तन–सेवासमुद्युक्तैः करकलितकाञ्चन -[1]कुतूमुखनिष्पतद्गन्धतैलावसेकप्रज्वलितानेक-शतप्रदीपिकैः प्रणम्यमानः पुरुषैः प्रादीपिकैः सविनयमभिनन्द्य-मानश्च जयाशिषा वन्दिभिः अनुज्ञाय सकलं सामाजिकं लोकं, प्रविश्य [2]पारीन्द्र इव हिमवत्कन्दरं मन्दिराभ्यन्तरं विधाय समुचितं सान्ध्यं विधिं, निर्वर्तितनिशाभ्यवहारकृत्यः सफली-कृत्य च नैशिकमास्थानीमहोत्सवं गलितबालभावायाः निशी-थिन्याः [3]कलिन्दकन्यानजलकुवलयदलमेचकेन कटाक्षपातेनेव

---

1. कुतू — a leathren oil bottle 2. पारीन्द्र — a lion
3. कलिन्दकन्या — The River Yamuna.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कलङ्केन अलङ्कृते स्वीकृतप्रौढिमन्यमृतमयूखे तदीयकर-परिष्वङ्गोज्जृंभितस्य दुग्धाम्भोनिधेः उद्वेलेन कल्लोलदुग्ध-पूरेणेव अञ्जलिग्राह्येण ज्योत्स्नाप्रवाहेण आप्लाव्यमाने महीमण्डले तत्कालद्विगुणीभूतधवलभावायां प्रासादचन्द्रशालाङ्गण-भुवि रत्नपर्यङ्कपरिकल्पितमविरलविकीर्णनवमालिकाकुसुम-भरगर्भितविमलप्रच्छदपटस्पृहणीयं भागचतुष्टयावस्थापितचन्द्र-मणिशिलासालभञ्जिकाकरतलविन्यस्तपल्लवरागरत्नप्रदीप – दीधितिविच्छुरणारुणायमानपरिसरं हेमदण्डिकाचतुष्टय सन्दानितेन प्रलम्बमानमुक्तागुच्छशतपरिष्कारिणाऽभिव्याप्य भुवन-मखिलमप्यतिरिक्तेन, निजकीर्तिपट्टदुकूलेनेव, परिकल्पितेन तरुणीजनस्मितोल्लासिनोल्लोचेन आकल्पितोपरिभागं राजहंस इव दुग्धलहरीक्षालनधवळं क्षीरोदपुलिनं परिष्कुर्वन् हंसतूल-शयनीयं तदवसरानायितोपनताभिः परिचारिकाजन करतल-विन्यस्तकस्तूरिकाचन्दनपटवासताम्बूलकुसुमदामभिः अनन्वयेन, मुखचन्द्रेण, उत्प्रेक्षया दृशा, प्रौढोक्त्या वाचा, विकस्वरेण स्मितेन, उपमेयोपमया कुचकुम्भयुगश्रिया, मिथ्याध्यव-सित्या[1]वलग्नसक्तया, सूक्ष्मेण परिधानीयांशुकेन, ललितेन पद-विन्यासेन, दीपकेन रूपेण, विचित्रेण विलासेन, अधिकेन कौशलेन, अनुगुणेन आचरणेन च स्वयमेव अलङ्कारीभूताभिः, विश्राणयन्तीभिः, वीटिकाश्चर्वयन्तीभिः, अङ्गानि सुरभिणाऽनु-

---

1. वलग्न — the waist

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लेपनेन तिलकपङ्क्तीभिः, फालतले मृगमदेन, अर्पयन्तीभिः, कुसुमदामानि, कण्ठसीमनि, विकिरन्तीभिः पटवासरजो, वीजयन्तीभिः कनकमुष्टिभिः तालव्यजनैः, संवाहयन्तीभिः मृदुना करपल्लवेन चरणकिसलयं आलपन्तीभिः मधुरमपाङ्ग-यन्तीभिः च साकूतं अरविन्देन मुखेन, अशोककुसुमेनाधरेण, आम्रपल्लवेन पाणितलेन, नवमल्लिकया स्मितश्रिया, नीलो-त्पलेन नयनयुगलेन, मधुकरमालिकया रोमलतया, धनुर्यष्टया च भ्रुवा शास्त्रशालाभिरिव भगवतः, शाम्बररिपोः कुशलाभिः सर्वास्वापि कलासु वाचालयन्तीभिः नखमुखैः वल्लकीगुणान्, आपूरयन्तीभिः ताम्बूलसुरभिलेन सुखमारुतेन मुरलीमङ्गी-कुर्वतीभिश्च सरसां सङ्गीतभङ्गीं, लोचनमयेन मुखेन, कुचकलश-प्रायेण, भुजान्तरेण, त्रिवळिप्रचुरेणोदरेण, नितम्बात्मना मध्येन च अनुपलम्भमानाभिः क्वचिदपि तुलां निजगात्रलताभिरिव **श्रीमत्सुलक्षणा**नुगताभिः अवरोधवधूभिः सह सम्मानयन् शम्बररिपुशासनं पाकशासनश्रीः एवमविज्ञायमानयामो गमयन् त्रियामाः, प्रतिमासश्च अधिवलक्षपक्षद्वितीयममृतदीधितिरि-वानुदिनोपचीयमानश्रीः, आनन्दयन् सन्दर्शनेन सकलमपिलोकं, कदाचिदुपजायमानया[1]श्यैनंपातोत्कण्ठया मौलिकलितेन शुक-पक्षतिश्यामलेन उष्णीषेण वलयितशैवालमञ्जरीकं अम्बुरुह-मिव मुखमण्डलं बिभ्राणः प्रौढतरबिसिनीपलाशोदर–सोदरेण च

---

1. **श्यैनंपात** — hunting with hawks

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

त्रञ्चतां कञ्चुकेन, कवचितगात्रतया हरितकुथावकुण्ठित इव अभ्रमुकामुकः कटितटनिबद्धासिधेनुकः, प्रगृह्य शरधनुषी पाणिद्वयेन, पार्श्वद्वयावबद्धपञ्चषनिषङ्गं [1]पल्याणकटकानुषञ्जितानेकशक्तिप्रासतोमरं आमुक्तकार्ष्णायसमय[2]कङ्कटं अधिरुह्य जवविजितसमीरण—[3]स्मयं हयं तत्समयसुलभसेवालाभोपयातैः लोहशृङ्खलानियमितकन्धरान् प्रपतिताभ्यां कर्णाभ्यां प्रलम्बमानया जिह्वयावेष्टितेन लाङ्गूलेन दुःश्रवणभषणेन दुर्वचनचापलेन च कामप्याकृतिवैचित्रीं बिभ्राणानप्रेयसारान् सारमेयान् आकर्षद्भिः कालायसप्रायालङ्कारधारिभिः कण्ठावलम्बितकृष्णलासरैः (குன்றிமணிச் சரங்கள்) वनतरुपल्लवविहितपरिधानकृत्यैः, लताप्रतानवलयितकेशपाशैः, करकलिताऽऽखेटकोचितोपकरणैः, अतिनीलतयानुलिप्तावयवैः इव सूचीभेद्येन संतमसेनाहर्निशोपकल्पितारण्यकसत्वबाधैः अनुगम्यमानो व्याधैः प्रविश्यारण्यानीं प्रसारितासु परितो वागुरासु समापूर्यमाणेषु च मृगकुलप्रेरणयाऽतिभैरवरवभरितगहनान्तरेषु शृङ्गेषु अतिमात्रोद्भूतेन साध्वसेन चञ्चलतरलोचनाञ्चलमरीचिनिचयकवचितदिङ्मुखमवलोक्य सर्वतः सत्वरमुत्प्लुतिबहुलं मुहुर्मुहुः वळितग्रीवं च दर्शं दर्शं पलायमानान्, द्विगुणितरयं प्रधावितेन तुरङ्गेण गृह्णन् जीवग्राहमेव कुरङ्गान् दुर्धरतरोपरोधक्रोधघुरघुरायमाणगळगह्वरान्, आपततोऽतिवेगेन निघ्नन्

---

1. पल्याण—Saddle 2. कङ्कट — armour 3. स्मय — Proud

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कीटघातं वराहानतिक्रूरतारकं पश्यतः पुनःपुनः विहितेन गात्रविधूननेन प्रवर्षतश्च शललीशलाकावर्षं शातयन्, प्रतिविसृष्टेन शरवर्षेण शल्यनिवहानर्दयन्, सपत्राकरणेन शार्दूलान् मर्दयंश्च, निजहयहेषारवश्रवणदुराधर्षरोषविन-मितविषाणाऽऽहतिसमुत्खातक्षितितलधूलीधूसरितवेषान्महिषान्-अन्यान्यपि वशीकृत्य सत्वानि वन्यानि असकृदनुभूयमान-व्यायामतयाऽनुपजायमानश्रमस्वेदसलिलमापूरयन् मृगयाविहार-कौतुकं, कदाचन प्रकल्पितमर्यादाभित्तिकमुन्मुक्तयोः परस्परा-भिमुख्यासहनद्विगुणीभूतेन मदोत्सेकेन प्रक्षरन्तीभिः सप्तधा दानजलधाराभिः प्रस्रवन्निर्झरयोरिव पृथ्वीधरयोः ईषत्प्रसारित-पाश्चात्यचरणद्वयं अवष्टब्धपूर्वाङ्घ्रियुगं अन्योन्यग्रथितशुण्डा-दण्डं अचञ्चलश्रवणाञ्चलं आरचिततिर्यक्प्रेक्षितमितरेतर-सारजिज्ञासयैवाऽवस्थितयोः मुहूर्तमिवतूष्णीं मिथोपसारणविहि-तोद्योगयोः तत्कालाङ्गीकृतस्वस्वपक्षीयताजनितपक्षपातविशे-षेण प्रतिक्षणजायमानमार्दवौजायितोन्मिषद्विषादहर्षानवस्थित-मूकभावमौखर्यकलकलेन, समाबद्धमण्डलमवस्थितेन जनौघेन सापेक्षं प्रेक्षमाणयोः निजनिजविजयाशंसिहास्तिपकपादा-ङ्गुष्ठनोदनदुराधर्षामिर्षपारवश्योल्लङ्घितसीमाभित्तिगळगह्वर-निर्गलदतिगम्भीरबृंहितोबृंहितघनाघनगर्जितमुच्छृङ्खलशृङ्ख-लारावमुदग्रीभवद्ग्रैवेयकघण्टिकाटङ्कारमुत्तालकर्णतालाऽनिलो-द्धूतकुम्भतटसिन्दूररजःपुञ्जपिञ्जरीभूतहरिदन्तरमतिसाध्वसो-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ड्डीनरोलम्बकदम्बोद्वेसीभूतगण्डमण्डलं दुस्सहदन्तमुसलघात -
घृष्टलोहवलयनिष्पतद्विष्फुलिङ्गसङ्घपरम्परमीषदपसरणकुपित--
ऽऽधोरणकरनिष्टुराङ्कुशारोपजातक्षतविवरक्षरदक्षीणतरक्ष -
तजसमुत्क्षणजनितगात्रारुण्यविडम्बितसन्ध्याम्बुदछविपराक्रम -
माणयोः ससंरम्भं कुंभियूथपयोः समीकविलोकनेनानुभव-
न्नयनयोः फलं जातुचित्साम्मुख्यमानीतयोः परस्परावलोकन-
दुर्निरोधेन क्रोधावेशेन सुदूरमपसृत्य साटोपमशनिनिष्पेष-
निष्ठुरसङ्घट्टनस्फुटितमस्तकं शृङ्गाग्रखलखळायमान—लोहकटकं
घटमानयोरविरळकेशकम्बलभीषणवेषयोः मेषयोः संप्रहार—
साहसावलोकनेन अन्यदा च अन्योन्यस्पर्धाविवर्धमानाहम्भावा-
वष्टम्भगम्भीरयोः मुहुर्मुहुरास्फोटितबाहूरुदण्डमुद्धुरतरक्रोधा-
वेशदष्टाधरोष्ठमतिनिष्ठुरवज्रमुष्टिप्रहारत्रुटितमूर्धादिप्रदेशप्रक्ष-
रद्भूरितरक्षतजसमुत्क्षितारशरीरमुत्क्षेपणावक्षेपणोपसर्पसार --
णापसर्पणपरिभ्रमणपार्श्वभ्रमणादिक्रियोपलक्षितं स्कन्धेनस्कन्ध-
मुरसा चोरःस्थलमाहत्याभिपततोः प्रवृत्ततुमुलतलातलिमुष्टी-
मुष्टि बाहूबाहु वियुध्यमानयोस्साग्रहं चाणूरमुष्टिकप्रतिमल्ल-
योर्मल्लयोर्नियुद्धकौशलनिरीक्षणेन, समयान्तरे च [1]अंशुयुगल-
सन्दानितपाश्चात्यचरणद्वयमवमुक्तस्यातिरभसघणंघणायमान -
ग्रैवेयघण्टागणम् अगणिताऽऽधोरणनिष्टुराङ्कुशायातं अनुधा-
वनसाध्वसस्खलितनिपतितं जनमुल्लङ्घ्योल्लङ्घ्य पलायमानैः
पौरैराकुलीभूतरथ्यान्तरं उन्मस्तकाघट्टन विध्वंसितानेकहर्म्य-

1. अंशुयुगल — Double roaps

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भित्तिदुस्सहदन्तकुन्ताघातजातोद्वेगैः उन्मूलिताऽऽलानस्तम्भं उच्च तरफीट्कारभैरवं प्रद्रवद्भिः गजान्तरैः बहलीभूतनगरकोलाहलं प्रधावतः प्रमत्तस्य दन्तिनः परिभ्रमणाडम्बरनिशामनेन च विनोदयन्नात्मानमनुवत्सरं चापगतेषु मेघंकरेष्वहस्सु अपनीतायां च कादम्बिनीयवनिकायां दिक्षु प्रकटीभवन्त्याः शरल्लासिकायाः स्फुटोपलक्ष्यमाणैः विलासैरश्वति महान्तमुल्लासमखिलेऽपि जगति महतीं अवाप्य श्रियमल्पक इव तापयति सकलमपि लोकं तपने गुरूभवतः शरत्कालस्य प्रसादातिरेकेणापगत–कालुष्याणि सरित्सरोहृदयानि सेवमानेषु शमदमादिष्विव गुणेषु हंसनिवहेषु विपदि कातरहृदय इव शोषमुपेयुषि भुवि निपद्वरे-प्रत्यहमुपनीयमानेन निजबान्धवप्रतापेन समधिकलक्ष्मीकतामुपयत्सु सरोरुहेषु अवितथीकृतलोकाभिसारविधिरनुविजय–दशमीं दशमीनकेतुलावण्यः शमीमर्चयिष्यन् विजयप्रयाणोत्साहसविशेषहेषारवभरितगगनोदरं अनवरतदंष्ट्राग्रसङ्घटन–खणखणायमानखरतरकविकाक्रटककषणफेनायमान सृक्कभागं अधिपृष्ठतटमवस्थापितकल्याणमयपल्याणघटितमहनीयमणि – किरणकिम्मीरितपार्श्वद्वयपरिसरं अतिचटुलखुरपुटपटुतर – पादाहतित्रुटितधरातटसमुद्धतधूलीपटलधूसरितदिङ्मुखं निजो–त्पतनाभिपतनपर्याप्तसमुन्नतिविस्तृतिशालिनी वा नवेति विलोकयितुमिव नभः क्षितितले मुहुरुन्नमयन्तं पुनरवनमयन्तं च कन्धरां चतुर्भिरपि चरणैः विक्रममाणस्य मे न पर्याप्तमखिल-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मपि महीमण्डलमितिव्योमपथा-उत्क्षिप्तपूर्वाङ्घ्रिद्वयं अत्यन्त-मभिनृत्यन्तं अतिजवनतया वहन्तमिव विष्टरश्रवसं आरोहन्तं इव कुरङ्गस्कन्धं अत्युन्नततया च अप्रसारितकरमिव करिकल-भकमुदाहरणमिव उच्चैःश्रवसस्समुत्तुङ्गं अधिरुह्य तुरङ्गमं परिस्फुरद्विविधरत्नालङ्कारतया सञ्चरमाण इव मानुषवेषेण रोहणगिरिमौळिविनिहितमहनीयतपनीयमयकोटीरकोटितट – प्रत्युप्तविविधरत्नश्रेणिविनिर्गत्वरैः किरणनिकुरुम्बैः विनिर्मि-माण इव विचित्रमुल्लोचमम्बरमण्डपे बाहुवक्षस्थलगतानां च महार्हमणिभूषणानां विसृमरैरंशुजालैः कुर्वाण इव चित्रपटाव-कुण्ठनं दिग्भित्तिषु सुदृढावबद्धरुक्ममयत्सरुमनोहरया निजकर-तलगताया निखिलदिग्विजयश्रियो वेणीलतिकायमानया खड्ग-लतया सकलरिपुनृपकुलारिष्टद्योतिकया नीलविद्युतेव तटित्वान् आरूढवक्षोहर्म्यतलायाश्च-साम्राज्य लक्ष्म्याः करगतेन उन्नाले-नेव केलिपुण्डरीकेण श्वेतातपत्रेण समुल्लसत्पूर्णसुधांशुमण्डल इव राकानिशीथसमयो निजयशःक्षीरार्णवतरळतरङ्गानुकारिभ्यां पार्श्वतः परिजनकरतलोद्धूयमानाभ्यां चामराभ्यां प्रेङ्खोळि-तोत्तरीयकनकांशुकपल्लवो मूर्तिमान्महोत्सव इव लोकलोचनस्य गजेन्द्रस्कन्धाधिरूढेषु उपश्लोकयत्सु पार्श्वयोः दाक्षिणात्येषु महाकविषु उपवीणयत्सु च साङ्गीतिकेषु पुरतोऽपि च जय जयतामग्रेसर सरस्वद्गम्भीर भीरहित, हितकराखिलजनताया, नतायासनिरासक, सकलसद्गुणधामन्, धामनिधे, महामहोन्नति-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शालिभोसलकुलकुवलयोल्लासचन्द्र, चन्द्रचूडगुणकथाम्रेडनजागरूक, रसज्ञ, रसज्ञजनप्राग्रहर, हरतनूजप्रभाव, भावजसुन्दरदस्मितालङ्कृताधर, धरणीवलयवासव, सवनप्रीणितामरलोक, लोकोत्तरचारित्रनिदान, दानवमथनांशावतार, तारकाधिपकिरणगौरकीर्तिपूर-समार्जनपर, परबलप्रमथन, धनञ्जय, धनञ्जयतेजोदुःसहप्रतापप्रसर, सरलान्तःकरण, रणाङ्गण–गाङ्गेय, [1]गाङ्गेयमयकुण्डलमण्डितकर्ण, कर्णाधिकविश्राणन, विश्रुत, श्रुतसम्पन्न, पन्नगपरिवृढभोगोपमबाहुसार,सारसपत्रेक्षण, क्षणक्षणोपचीयमानसंपत्समृद्धिपराभूतराजराज, राजचूडामणे, महाराजेति स्तुवत्सु प्रगल्भवचःसु वन्दिमागधवैतालिकेषु प्रतिध्वनयति भुवनोदरमतिगभीरे भेरीमृदङ्गशङ्खकाहळीनिनादकोलाहले बधिरयत्सु च लोकश्रवांसि कठोरेषु वल्लियन्त्रठात्कारेषु आरूढहयगजरथमाबद्धरेखमवस्थितान् वाजिवरगतैर्वेत्रपाणिभिः निर्यच्छत वाहान्निह्लीत करिणो बध्नीत मौलिष्वञ्जलीन, अवधत्त संतरामुपसर्पत क्षिप्रमपेत दूरे विजहित वर्त्म मा वितनुत संमर्दं यातागतः प्रचलत पार्श्वतः समाव्रजत पश्चान्निध्यायत पुरतो मा विरुन्ध परस्परं मा शब्दायध्वमुच्चैर्दयते वो महाराजः कटाक्षयते च सप्रसादमिति व्याहरद्भिः पुरुषैरेकैकशः प्रस्तुतनामग्रहमावेद्यमानान् सविनयविहितैकपाणिप्रणामान्मौळिस्पृशा करकमललीलाशराग्रेण, संमानयन् सेनाध्यक्षान् प्रचलितः

---

1. गाङ्गेय — Golden (सुवर्ण)

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

शनैःशनैः राजमार्गेण विलोकनकुतूहलिनीनां चापरिसमापित नेपथ्यरचनाप्रकारं अप्रतिपालितसखीजनानुगमनम् अतिरभस-चरणविन्यासझणझणायमानमणिमञ्जीरशिञ्जितानुसारिभवन-कलहंसिकानुक्रियमाणगतिविलासम् अतिलघुसमुल्लङ्घितसोपान-परंपरायासप्रमाणाधिकनिश्वासपवनवल्गदुरोजकुम्भयुग्ममारूढ-हर्म्याग्रतलानां प्रतिदिशमुपजनितकुवलयदामतोरणभ्रमैः कटाक्षविभ्रमैः परिभ्रमयन्तीनां प्रेक्षकमनांसि, पौरविलासि-नीनां मन्दस्मितजनितसविशेषविकासैः वदनारविन्दविलासैः समुदितशीतांशुविम्वसहस्रादिव निर्गत्य बहिः पुरात् प्रदीप्य-मानासु परितः प्रज्वलतो निजप्रतापानलस्य समुज्वलास्विव ज्वालासु, निःसारितभुवनगृहाभ्यन्तरतिमिरनिकरासु प्रदीपि-कासु नृत्यन्तीषु च पुरः सहेलमष्टादशद्वीपलक्ष्मीष्विव वेशाङ्गनासु सुविहितशमीसपर्यस्तत्रच सेवागतान् पुरस्कृतविवि-धोपहारमवनितलपर्यस्तनिखिलावयवं प्रणमतः, सामन्तभूपा-लान् देशाधिकारिणश्च सम्भावयन्नपाङ्ग सङ्गिन्याःश्रियः स्मित-चन्द्रिकोल्लासैरिव प्रसादधवळैः कटाक्षैः निर्वर्तयन् विजयमण्टप-यात्रोत्सवं, अतिक्रान्तेषु च चतुःपञ्चेषु मासेषु, विन्यस्यमाने वन्यायामवतरता कुसुमाकरेण पदे गताधिकार इव जिगमिषति कलिवशाद्धर्मइवैकपादावशिष्टे शिशिरसमये गणरात्रातिक्रमणेन पटच्चरीभवति प्रालेयमये दिक्सुन्दरीणां प्रावरणेऽति जरत्याः शिशिरर्तुश्रियः दशनेष्विव शिथिलीभवत्सु कुन्दकुड्मलेषु मनोज्ञ-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

किसलयस्वीकारेण अनास्थां वहति, गळत्सु निस्सारपुराणपर्णेषु तरुषण्डे सञ्जीभवति च जगद्विजायाय भगवति शम्बरारातौ निर्जिगमिषति मलयगिरिकन्दरोदरान्मरुति दाक्षिणात्ये लुठति कण्ठान्तर एव वनप्रियाणां पञ्चमध्वनौ सङ्गतायां च फल्गुनीभ्यां सह पौर्णमास्यां कौसुम्भमयोष्णीषकञ्चुकालङ्कृतमूर्तिर्मूर्तिमानिव विकसदशोकस्तबक सुषमारुणश्रीःवसन्तः [1]परिहितमाञ्जिष्ठवसनाभिः गैरिकक्षोदनिर्मिताभिरिव सालभञ्जिकाभिः कौस्तुभमणिकिरणविच्छुरणशोणायमानदेहद्युतिमनुकुर्वाणाभिः विष्णुवक्षस्थलगतां श्रियं, अन्तःपुरिकाभिः समानवेषशालिभिश्च सवयोभिरनुगुणदासीदासेन च परस्परां गाङ्गेयमयशृङ्गविवरोच्चलत्कुङ्कुमसलिलस्नपितगात्रमवकीर्णपिष्टातक -चूर्णसन्ध्यायमानगगनाङ्गणतलं सफलयन् होलामहोत्सवलीलास्समुन्मीलितासु च अमन्दचन्द्रातपसान्द्रासु निष्प्रत्यूह विसर्पद्दर्प–कन्दर्पशरव्यापारभूरीभूतपथिकवधूजनहृदयज्वरासु सुरभिमासनिशासु अमृतकरकरपरिस्पर्शद्रवदुपान्तसौधचन्द्रमणिमय –चन्द्रशालास्यन्दमानैः तुन्दिलैः सलिलनिष्यन्दैरनुनिशमापूर्यमाणतया, अक्षीयमाणाम्भसि व्याकोचकुमुदकुवलयारविन्देन्दीवरसौगन्धिकषण्डसमुद्घातसुन्दरमकरन्दबिन्दुनिकुरुम्बकरम्बि –ताभ्यान्तरे क्रीडासरसि अतलस्पर्शतया पयसो निरस्तक्षेपणीदण्डमरित्रपर्यस्यमानसलिलैर्मन्दमन्दं सञ्चारितां कर्णधारैरभ्यर्ण-

---

1. परिहित—surrounded 2. अरित्र—an oar Propelling the boat

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

स्थापितानेकप्लवां अन्तरसारैरतिलघुभिर्दारुभिरुपकल्पितामपि जलैकगतिमपि जगदुत्तारणगुणेनाश्रयणीयाञ्जनैराबद्धनव -मल्लिकामण्डपमण्डितोर्ध्वदेशां स्वास्तीर्णधवलाम्बरां चलच्छन्न-पर्यन्तां पयःपयोनिधिवीचिवेल्लनदोलायमानामहिराजशय्यामिव श्रीरमणो नावमधितिष्टन् अनुभवतो नौकाविहारमम्बरतरङ्गि-णीजले दिवस्पतेः काकतालीयामिह प्रतिविम्बलक्ष्मीमवलम्बमान-स्सन्ततमित्थमेव प्रस्तुतैः तेषु तेषु दिवसेषु तैस्तैरुत्सवविशेषैर-जानानोऽतिक्रामतोऽनेकान्वर्षपूगान् श्रीमद्रघुरमणयशःप्रशस्ति-महाप्रवन्धे सेतुवन्धे साक्षात्कृतस्य भगवतो-दाक्षायणीरमणस्य प्रसादातिशयेन समानाभिजनशालिन्यां देव्यामुदयगिरि-मेखलयामिव चन्द्रमसा कोसलराजसुतायामिव रामचन्द्रेण समुदि-नोभयकुलानन्दनेन नन्दनरत्नेन परिहृताधमर्ण्यः पितृषु अनितर-नृपसाधारणैः निजान्वयानुगुणैः अखिलैरपि गुणैरहरहस्समुप-चीयमानयाऽपचयोन्मुखश्रीरित्यपहसन्त्याणर्विकं शवंरीवल्लभं सत्पथगामिन्य इति श्लाघमानया तारकाः स्वयमिव व्याप्त-भुवनत्रयेति सखीचारमाचरन्त्या सुरसरिति निष्कलङ्क इति वहुमन्यमानया स्फटिकाचलमवदातगुण इति भक्ति-माचरन्त्या भगवति चन्द्रमौलौ असावप्यहमिव विहरिष्यति इति असूययन्त्या वाग्देव्यै, स्वेनेव जगद्भ्रमणशील इति सहाय-यन्त्या कलहप्रियं मुनिमुन्मत्त इति परिहरन्त्या सुरेन्द्रदन्तिनं सर्वगामितापवादपरिजिहीर्षया सत्यापयन्त्येव शेषाहिस्पर्शेन

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

व्रतयन्त्येव गोक्षीरं शुचिजडयोरयुक्त एकीभाव इति पृथक् तन्वत्येव पयसि विरहतप्तयेव परिशीलयन्त्या मृणालानि अङ्गी-कुर्वन्त्या चन्दनरसमाददत्या हिमवालुकारजांस्याश्रयन्त्या च हिमवदुत्सङ्गशिलातलमखिलभुवनभ्रमणजनितोदन्ययेव पिपा – सन्त्या दुग्धार्णवं अलङ्क्रियोद्युक्तयेव विचिन्वत्या नवमालिका-कुसुमानि मृगयमाणया च मुक्ताफलान्याकल्पमवस्थातुमिव स्वी-कुर्वत्या पीयूषरसमनुसन्ध्यासमयनटन्महानटजटाजूटरिङ्गद्ग – ङ्गातरङ्गानुषङ्गनिष्कलङ्कवतंसशशाङ्कमयूखाऽवदातया कीर्त्या धवळयन् भुवनत्रयीं कनीयसा वयोभिर्ज्यायसा गुणोदयेन अतिशयितसुमित्रापुत्रसौभ्रात्रेण छायाबिम्बेनेव स्वमनुसरता **श्रीतुलजाजि**भूपनाम्ना सहभ्रात्रा उपभुञ्जानश्चिराय साम्राज्य-सुखानि शश्वदाचरन् विश्वजनीनान्येव कृत्यानि प्रवर्तयन्ननवरत-मिष्टापूर्तानि मानयन्महतोऽनुगृह्णानो दीनान् निगृह्णानः खलान-तृप्तइव सङ्गृह्णानो गुणिनस्सकललोकानन्दनश्रुतः श्रुतानुगुण-दर्शनो दर्शनागुणफलोदयोऽसौ जयति विजयते विजयतेजाः प्रतिनृपतिसिंहरंहःप्रशमनशरभः **शरभमहाराजः** ।। श्रीरस्तु ।।

शरभनृपालविलासः

स एष जगन्नाथपण्डितनिबद्धः ।

रसिकेभ्यः स्वदतां इह

रसलेशेनापि वकुळवदलिभ्यः ।।

CC-0T Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कल्यब्देषु गतेष्वक्षिकरदिक्सिन्धु सङ्ख्यया ।
वत्सरे शुभकृन्नाम्नि व्यरचीदं निबन्धनम् ॥

पदप्रौढिभागन्वयौदार्यशाली
समर्थो जनानन्दकृत्सद्गुणौघः ।
विजेजीयतां विश्वमातुः प्रसादा–
त्प्रबन्धः प्रबन्धाप्यसौ नायकश्च ॥

अस्तु चिरन्तनसूक्ति–
प्रस्तुतचरणाम्बुजप्रभावं नः ।
निस्तुलमभीष्टसिध्यै
वस्तु गिरीशाङ्कभूषणीभूतम् ॥

श्रीदक्षिणामूर्तये नमः ॥ श्रीगुरुभ्यो नमः ॥
श्रीदेव्यै नमः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

AN APPEAL

Manuscripts on Palm Leaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar-King of Tanjore, Rajah Serfoji, has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous 'Sarasvati Mahal Library'. It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up ? The Library waits for your answer.

Director,
Sarasvati Mahal Library, Thanjavur.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy